हिमकुन्देन्दुदशनं कोटराक्षं सुभीषणां ॥ खड्गचर्म्मधरं देवं शरचापं समन्वितं ॥ परशुभगदावज्रं शूलप्रहरनोद्यतां ॥ दशाङ्
कुशाधरं देवं प्रणतानिविनाशनं ॥ एवंविध्वंसमाध्यायेपूजितव्यं प्रयत्नतः ॥ अस्तु कालानलं ध्यायेन्दीप्यमानं सुतेज
सं ॥ नीलजीमूतसंकाशं महाघोरं सुदारुणं ॥ लेलिहानं महाभीमं ग्रसंतं सचराचरं ॥ एकवक्त्रं चतुर्दंष्ट्रालं त्रिनेत्रं रक्तवर्त्तु
समुन्नजयंतं महाउग्रं गर्जन्तं भीषणारवं ॥ अष्टबाहुं महाभीमं खड्गखेटकधारिणं ॥ त्रिशूलं खट्वाङ्गपाशमुद्गरधारि
णं ॥ कामदण्डधरं देवं मुण्डमालाविभूषितं ॥ चर्च्चयन्तं महास्थीनि रुधिरारुणालेपितं ॥ पिबन्तं रुधिरं घोरं यानिशङ्ख
गात्रानुसुन्दरी ॥ त्रिशूलं वक्षनिर्मितं दक्षेणनशिरसाहतं ॥ पतितं पादमूलेतु शिरं छित्वा महाहसितां ॥ एवंध्यात्वा वरा
रोहि शत्रुगात्रानुसुन्दरी ॥ त्रिशूलं वक्षनिर्मितं दक्षेणनशिरसाहतं ॥ पतितं पादमूलेतु शिरं छित्वा महाहसितां ॥ एवं ९

ध्या.मा
४९

ध्यात्वावरारोहेशत्रुनिग्रहकारणात्॥ ॥उमापतिध्यानं॥ बन्धूककुसुमाभंचसार्द्धचन्द्रशेखरं॥ दक्षिणोर्द्धकरेशूलं
नदधोवरमुद्रिका॥ वामोर्द्धेनकपालंतदधोहस्तेनचौभयं॥ ध्यानेनित्यवामोरुपीठस्थायागरोत्थरः॥ रक्ताम्बरक
लापाश्वसितवनवासवाहन॥ सर्वाभरणसंदीप्तेदेवदेयासुशोभितं॥ स्मरवक्त्रंत्रिनयनंसर्वाभरणभूषितं॥ ॥तु
मुरुरुद्रस्यध्यानं॥ रक्ताननिभंशुभकलाभरणांत्रिनेत्रस्वट्वाङ्गपाशाङ्कुशशुभयालहस्तं॥ वेसाननंचापिवनाशमम-
घोभूषंरक्ताङ्गरागकुसुमांशुकमौडे॥ उग्रदंष्ट्राविरूपिरंचतुर्वक्त्रंत्रिलोचनं॥ चन्द्रार्द्धशेखरंहस्तेश्चतुर्भिर्द्धधतंच
मात्॥ दक्षिणोर्द्धकरेदेवीस्पृशिरांखट्वाङ्गपाशाधः॥ पाशावामोर्द्धहस्तेनकपालंदधाक्रन्तं॥ रक्ताङ्गरागाभरणांशुकिक्षि
पीनतासिवं॥ अमर्घ्यरत्नाकल्पाचंध्यायेहेवांसिवसिवे॥ भीअनोहिप्रतीकाशमूर्द्धपिङ्गजटाधरम्॥ वर्णलोग्रत्रिनय राम:
नंभीसर्पविभूषणं॥ द्रष्टाकरालवदनंभीमरूपंदिगम्बरं॥ ॥ हिभुजंदक्षिणोहस्तेगदांवामेकपालकं॥ अनन्तमयंवृ ४९
पारूढंजटाहिन्तुत्रिगुणं॥ द्विपिचेर्मध्यवरंकुर्यात्श्रीनाहस्तस्यतुमनुरं॥ सानुसामादिनोनित्यंपूज्ञहस्तामथापिवं:॥

अम्बकस्य ध्यानं ॥ हस्ताभ्यां कलशोद्वयोमृतरसैराप्लावयन्तं सिरो द्वाभ्यां तो दधतं मृगाक्षवलये द्वाभ्यां वहन्तं वरं ॥ अ
ङ्कन्यस्तकरद्वयामृतघटं ॥ व्याघ्राजिनं शुक्लं सोमस्थंनाग यज्ञो पवीतिनं ॥ त्रिशुलचाक्षसूत्रं च कपालं कुण्डिकां क्रमात्
याम्ये सौम्यास्य विभ्राणां ताभ्यां याख्याराकं तथा ॥ पद्मासने स्थितं कुर्यात् हंसनाथं हरं प्रभुं ॥ गौरशिनास्वरं शाजंक
मण्डलुसमन्वितं ॥ धन्वन्तरिं सुसंनज्ञुवानराख्यनरांगतः ॥ अमृतावामहस्तचक्कुर्यान्नमाश्वेयोसदा ॥ ॥ त्रिदशेश्वर
ध्यानं ॥ ध्यात्वा हृदम्बुजावस्थं शशांकशानं निर्मलं ॥ पीनस्थवृत्तसमाहृदं शूलं खट्वांगधारिणिं ॥ ॥ योगेश्वरस्य (
ध्यानं ॥ पद्मासनं समासीनः किंचिन्मीलितलोचनः ॥ घ्राणाग्रेदत्तदृष्टिस्याद्धेनपञ्चोपरिस्थितं ॥ वामदक्षिणगौह
स्तावुत्तानावंकभागगौ ॥ नन्कारद्वयपार्श्वस्थ यंकेरुहमत्रागरेः ॥ ऊर्द्धकरद्वयेन स्यपांचजन्यसुदर्शनं ॥ ॥ श्रीभो
ध्यानं ॥ नतस्तु उमयादक्षवामदक्षार्द्धविग्रहं ॥ वराभयकरापेत्रं मुण्डमालिनं पुराणशैकन्वग्वसनं शान्तमन्तमुरं तु
रुं ॥ ॥ ईश्वरस्य ध्यानं ॥ शुद्धस्फटिकसंकाशं स्थागास्थफिकिरणोज्वले ॥ चिन्तयेत्पंच मूर्द्धानं देवदेवमहेश्वरं ॥ चिपं

ध्या.मा. चनयनं सौम्यं पंचास्यं चन्द्रलोचनं ॥ दशबाहुं विशालास्यं नागयज्ञोपवीतिनं ॥ नीलनीलजनाराचखड्गासबलयाभयं ॥ खट्वीश्व
५० रं रहस्योक्तं दक्षिणापं चबाहवं ॥ बाजपूरधनुचर्मवरदंच्चकमण्डलं ॥ वामेषु देवदेवस्य बाहवं पंचकीर्तिता ॥ ॥ मार्त्तण्ड
भैरवस्य ध्यानं ॥ भास्वत्पचधारचकान्त्या धौतीन्द्विचित्तयेत ॥ षट्चक्रानुपरिन्यजोतहृद्वारेणरेचयेत ॥ अनन्तनाभिपद्म
स्थंपातयेतद्रवानतुं ॥ सर्व्वलक्ष्मोरुद्रसंस्कं पद्मस्वदभूषितं ॥ स्थूलघण्टासमायुक्तं मुण्डमालाविभूषितं ॥ एवं ध्यात्वार्घ्यं येन्म
धात्मखेराजलपुष्पने ॥ हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्वाङ्गचर्मौ चक्रं शक्तिं सपाशं सृणिमतिरुचिरा
मक्षमालां कपालं ॥ हस्ताम्भोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्तण्डवल्लभार्धं मणिमयकुण्डलहारदीप्त्यभिजाम
॥ ॥ व्याघ्रचर्मपरीधानं मुण्डमालाविभूषितं ॥ हुंकारं भ्रसुचनं संज्वलन्तं सहासितं ॥ त्रिशूलासीत्व कपालसृग्गोचरदं राम:
पाणिते ॥ तर्जाङ्गोकगदाचापं पाशायनकरानितं ॥ वटुकस्य ध्यानं ॥ कलकलितनकपालः कुण्डलीदण्डपाणिस्तरुण ५०
तिमिलनीलव्यालयज्ञोपवीती ॥ क्रतुसमयसपर्य्याविघ्नविच्छेदहेतुर्जयतिवटुकनाथः सिद्धिदः साधकानां ॥ ॥ उ

ऊर्ध्वरूद्रपरंदिव्यंचोरगेशानिबन्धनात्॥प्रसन्नास्यपरंशिंचनागयज्ञोपवीतिनं:देवंदिव्यनेत्रपरंशुभं॥नालचयपरन्दि
व्यंवामकरेणमनोहरं॥उक्षिणेलम्बकर्णस्याद्रूपेणनविवर्जितं॥ङ्किसुजेवीरणशिंचनागयज्ञोपवीतिनं॥वामाचप
तितजघ्याउन्नारांदक्षिणांभवेत्॥उत्तरायनिवर्द्धंचजानुदक्षिणावन्धनात्॥अङ्कदकंकरेणचोमौभुजगम्यारमेश्वरी
दिगम्बरश्चोर्द्धधनोमहासिंहासनेस्थितं:॥वीरभद्रेतिनामानंदेवीपुत्रंप्रपूजयेत्॥ वन्देवालंस्फटिकसदृशंकुण्डले
ड्रासिवक्रंदिव्याकल्पैर्नवमणिमयैःकिंकिणीनूपुराद्यैः॥दीप्ताकारंविशदवदनंत्रिनेत्रंहस्ताब्जाभ्यांवटुकमनिशंशूलद
ण्डौदधानं॥ उद्यद्भास्करसन्निभंत्रिनयनंरक्तांगरागंस्रजंस्मेरास्यंवरदंकपालमभयंशूलंदधानंकरैः॥नीलीपीत
मुडारभूषणाशान्तंपीनांपुष्टलोज्वलंवभ्रूकारुणवामसंभयहरंदेवंसदाभावयेत्॥ ध्यायेन्नीलाद्रिकान्तंशशिसकल
धरंमुण्डमालंमहेशंदिग्वस्त्रंपिंगकेशंडमरुमथशृणिखड्गपाशयानि॥नागंघण्टांकपालंकलसरसिरुहेवि-
भ्रतीभीमदंष्ट्रंसर्पाकल्पंत्रिनेत्रंमणिमयविलसत्किंकिणीनूपुराद्यं॥ शुद्धस्फटिकसंकाशंत्रिनेत्रोत्पललोचनं॥कु

ध्या.मा. ष्टिलालकसंवीतं चारुस्मेरं सुखाम्बुजं ॥ नानारत्नमयाकल्पैः किंकिणीजालनूपुरैः ॥ दीप्तसुधाम्बरावीतं विभुजं दक्षिणे करे
५१ त्रिशिखं सव्यहस्ते च दधानं दण्डमुत्तमं ॥ वटुवेषधरं शुभ्रं सात्विकं साधकस्मरेत् ॥ ॥ श्वेतवर्णं चतुर्बाहुं जटामुकुटधा-
रिणं ॥ त्रिशूलपाशहस्तं च दण्डहस्तं कमण्डलुं ॥ उद्यत्सूर्यसहस्राभं त्रिनेत्रं चन्द्रशेखरं ॥ रक्तांगरागमारक्तमाल्या-
म्बरविभूषितं ॥ स्मेराननं नीलकण्ठं नानाभरणभूषितं ॥ दक्षिणांके करे शूलं तदधो वरमड्डिये ॥ वामोर्द्ध्वहस्ते देवेशि क-
पालं तदधोभयं ॥ ध्यानं संस्मरेद्देवं स्मर्त्तॄणामभयप्रदं ॥ काम्यकर्मसु देवेशि ध्यायेद्देवं प्रभुं सदा ॥ ॥ क्रूरकर्मसु दे-
वेशि नाम सद्ध्यानमुच्यते ॥ अंजनाचलसंकाशं मुण्डमालाविभूषितं ॥ चन्द्रमण्डलसपिंगकेशभारं दिगम्बरं ॥ त्रिनेत्रं दक्षि-
णहस्ते डमरुं च सृणिं तथा ॥ खड्गं शूलं च देवेशि दधानमपरैः करैः ॥ अभयं नागपाशं च घण्टां चन्द्रकपालकं ॥ ऊर्द्ध्वादिक्रम- राम:
तो देवी भीमदंष्ट्रं भयानकं ॥ सर्वाभरणसन्दीप्तं मणिनूपुरमण्डितं ॥ किंकिणीजालसंयुक्तं ध्यायेद्वटुकभैरवं ॥ रक्ता- ५१
म्बराधरं देवं रक्तवर्णं चतुर्भुजं ॥ एकास्यं रक्तनेत्रं च पिङ्गभ्रू पिङ्गकेशकं ॥ दण्डशूलं तथा वर्त्तिकपालं कलशोभितं ॥

मालयज्ञोपवीतंचविप्रचिह्नेदकारकं॥कलङ्कस्मिसमाकीर्णां मयूरासनसंस्थितं॥तारकासुरहन्ताचवटुकाथत्व-
मामयहं॥ यरासुरववटुकास्यध्यानं॥यरासुरवावटुकेनुसुममपुत्रोमहाबलः॥अधिकारंमयादत्तंसमस्तेकुलमा-
सते॥स्वामिनंचमहात्मानंवलिभागंप्रगृह्यते॥योवन्मदत्तमवटुकेनावन्नैवकुलागमे॥कपिलोग्रमहास्यंपञ्जटाजूट
नुधारिणं॥पिंगाक्षंदशहस्तेचसर्व्याभरणभूषितं॥नागसंविघ्नसंघातंपुरतःपरिभावयेत॥ ॥क्षेत्रपालस्यध्या-
नं॥भजेदूर्ध्वजटाधरंत्रिनयनंनीलाजनीद्रिप्रभं॥दंष्ट्रानुगदाकपानमन्वरागग्वसगंधोज्वलंघण्टामेखलघर्घर
ध्वनिमिलन्झंकारभीमंविभुंवन्देसंहितसर्पकुण्डलधरंनक्षेत्रपालंसदा॥ भूतनाथमहस्वन्देवालंकानांजनप्रभं:
कपालंखड्गशूलेचडमरुंभक्षयांप्रभुं॥नीलाञ्जनाद्रिनिभमूर्द्धपिंगकेशंवृत्तोग्रनसुपातुगदाकपालं॥आशावरंसु
जगभूतमुद्रयदंकुक्षेत्रंशमज्जनंतुंप्रणमामिदेवं॥ कपालमालाभरणंखट्वाङ्गहस्तकं॥रक्षितंसर्वकर्माणि
क्षेत्रपालन्नमाम्यहं॥ सर्पयज्ञोपवीतांगंकपालावलिभूषितं॥खड्गफेटकखट्वांगंक्षेत्रपालनमाम्यतं॥ वर्वरा

पिंगकेशाश्चपिंगभ्रूपिंगलोचनं ॥ दशाक्षडमरुखट्वांगत्रिशूलंचकपालिनं ॥ बभ्रुकेशाग्रदंष्ट्राभ्यांकृष्णवर्णाभयंकरा
कपालमालिनःशूलधारिणःक्षेत्रपालःक्षेत्रपालका ॥ ॥ नीलांजननिभाःसर्वेरक्तांनायनलोचना ॥ उन्मत्तापिहृलाःस
र्वेपिबंतिमदिरासवं ॥ कपालेनविचित्रेणमुण्डमालेरनेककृता ॥ महासवस्मिरोभोजमानिनायोगिनाप्रिया ॥ प्रेतस्कन्धस
मारूढांवीरेशावीरवत्तिनावलिप्रदानेपूजायांसर्वेतेवरदायका ॥ एवमज्ञायनेदेवक्षेत्रपालविधानकं ॥ ॥ शूलंडमरुक
श्चैवकपालंखड्गमेवच ॥ दधानंकृष्णवर्णांतंभजेहंक्षेत्रनायकं ॥ ॥ चंडमौलिंपिंगकेशंमुण्डमालाविभूषितं ॥ दधानंडम
रुखट्वांगत्रिशूलंचकपालिनं ॥ नरासेनसमारूढरक्तवस्त्रत्रिलोचनं नीलवर्णंचतुर्बाहुंक्षेत्रपालंनमाम्यहं ॥ ॥ खस्था
नक्षेत्रपालंचसर्वक्षेत्रस्थितेश्वरं ॥ श्वेताह्वानिभन्देवंचतुर्भुजधृतायुधं ॥ खड्गखेटकहस्तंचडमरुखट्वांगमेवच:
कपालंशूलहस्तंचव्यालयज्ञोपवीतिनं ॥ नागाभरणभूषांगव्याघ्रास्तुकटिभूषणं ॥ मुण्डमालागलेयुक्तंनानाभरणभू
षितं दंष्ट्राकरालवदनापिंगभ्रूपिंगलोचनं ॥ त्रिनेत्रंचैवरुद्रंचउग्ररूपभयंकरं ॥ नराभंक्षेत्रपालंचसर्वकामफ

लप्रदं॥ ॥पश्चिमाम्नायक्षेत्रपालस्य ध्यानं॥प्रेतासनसमारूढं कृष्णवर्णं चतुर्भुजं॥एकवक्त्रं त्रिनेत्रं च खड्गखेटकधा
रिणं॥बिन्दुमुद्राकरं धूम्रो मुण्डमालाविभूषितं॥एवं ध्यात्वा महाक्षेत्रो वक्ष्यभारस्थितो यजेत् ॥ अकारादिसकारान्त
स्य ध्यानं॥चामीकरनिभः शूलगदाराजदुजाद्भयः॥चतुरस्यानिकायः स्यादकारः कूर्म्मवाहनं ॥ पाशांकुशकराभ्येनाप
मसंस्थो भवाहना॥वज्रध्वंयाजेनमिता स्यादमौक्तिकभूषणा ॥ पीनं करानकुलिशं परशुं वैरिनाशनं॥येषये
ननमाने स्यादिकारं कच्छपस्थितं ॥ दशयोजनदीर्घो भानाहंसो हंसवाहना॥ईस्यान्तुष्टि प्रदाम्बेतां मौक्तिकाद्यासिता
नना ॥ गदांकुशाकरं काकवाहनं कृष्णभूषणं॥योजनद्विजहस्यारणं मानमुद्दर्पमस्थरं ॥ पाशाशक्तिभुजं रक्तैव
ऋ विवस्थितो युगं॥ऊष्मप्रमाणं कालघ्रमृक्षवर्णाद्वयं भवेत्॥ ॥चतुस्याग्रहंसस्थं शुण्यंरागसमप्रभं॥पाशवज्र
करौ ऊंड्युगम्मानिरोधनं ॥ गदाफलारिसमाढ्यं करं हारविभूषणं॥चक्रवाकस्थितं स्यामसेकारन्तु सल्लवेत्॥
॥ ॥नवकुण्डनिभाः शूलवज्रवाहाद्विपस्थितः॥कोटियोजनमाला स्यादेहालेः कविनाकरी॥चिन्तयं सर्वतं शान्तिस

ध्या.मा. हस्तकरोज्वलं ॥ पीतंगोवत्ससंस्थं स्यात्सहस्रपेसीनरात्मकं ॥ ॥ नक्षत्रेसमनिभायासावज्रबाहुर्विभूतिदा ॥ योजनानांसहस्रेण
५३ स्यादीवर्णाभिनौजसी ॥ ॥ नवकुंकुमसद्भाय ॥ पद्मस्थोसत्तमभूषणः ॥ चतुर्भुजस्यादंवर्णोश्रीकरेशःखनाशकः ॥
वज्रशूलकरंधूलहंसखरवाहने ॥ सहस्रयोजनमितंस्वरान्तंद्विभुजंस्मरेत् ॥ ॥ भूपिच्छगजसंस्थःस्यान्नवकुंकुमसनि
भं ॥ शूलवज्रःकरःकरौःसहस्रहयथेनन ॥ पाशांकुशस्मरहस्तवामेघसंस्थोनिरोधनः ॥ योजनानांसहस्राणितः
कृष्णोविभीषणः ॥ ॥ पाशांकुशःकरःपद्मस्फटिकसंस्थोस्त्रणःद्वयः ॥ गकारसर्पभूतस्याद्धतयोजनसंमितः ॥
दण्डोलूखलसंस्थःस्याद्रक्तवज्रकरोमितः ॥ योजनानांसहस्रेणात्द्विभुखोत्रसिनेभर्गः ॥ कोटियोजनदीर्घोर्ध्वंता.
ग्नाहक्रांसज्वलनप्रभं ॥ ॥ द्विभुजंकाकवाहंस्यात्तद्वागंसुस्वयफलफलप्रदं ॥ युमाग्रयपद्मसंस्थस्याचतुर्वक्त्रैःसितः राम:
प्रभः ॥ चःकपर्दीत्तुगन्धाढ्यःकोटियोजनसंस्थितः ॥ ॥ सितनरत्वाद्विनिःपद्मेचतुर्बाहुस्थवर्णकः ॥ जंगेचकाटि ५३
मानौसश्चतुर्बाहुसितःप्रभौ ॥ योजनानांसहस्रैःस्यान्नपिनंकाकवाहनं ॥ विद्रुमसाकरंभर्गंक्षत्रवर्गोभुजद्वयं

॥ ॥कौबेरस्यौ द्विभुजस्तस्या नागभद्रो महाध्वनिः॥ धरापद्म गजेन्द्रस्थौः स्वर्णौद्दिकरोज्वलः ॥ लक्षयोजनमानः
स्याज्वलनाशकरो विभुः॥ उर्वर्णाण्यस्त्वबाहुस्याच्चतुर्वक्त्रः स्वलंकृत ॥ योजनानां सहस्रेणासितः कुवलयेस्थितः अग्नि
भिम्बाजगोधार्णोदशबाहुर्ज्वलन्प्रभुः॥ सहस्रमानं व्याघ्रस्थं योजनानां हि रां भवेत॥ षष्टिहस्तनसंस्थस्याच्चतुर्बाहुः स्व
लंकृतः॥ ॥सहस्रमानो गन्धार्यैः कुंकुमाभश्च नाशरः॥ कोट्ययोजनमानेस्याद्दशबाहुश्चतुर्मुखः॥ सितवर्णो वृषारूढः
स्ववर्णोपि भयंकरः ॥ द्वित्रसंषड्भुजं कोटिमानन्दमाहिषास्थितं॥ सिंहवाहश्चतुर्बाहुश्चश्चतुर्लेश्वसे मितं॥ द्विभुजं
कवाहं चनन्तहस्तैः सितं भवेत ॥ विंशद्भुजोदशास्यः कोटिमानो चकास्थितः॥ स्त्राकोटिमितः फर्शो योजनानां भुजद्वयः
तारकोरत्रसितां भोजं निपंराश्चचलः सितः ॥ षडास्यो द्विभुजं वः स्यात्स्त्राकोटिमितो हरणः॥ नीलोत्पललसद्धंसवाहनयु
क्तिसायकः ॥ त्रिहस्तं त्रिमुखं व्याघ्रवाहनं भीषणाकृतिं॥ दशलक्षमितं भार्गो धूम्राभस्यान्महाबलं ॥ चतुर्भुजो म
कास्यान्स विघोरगसन्निभः॥ मण्डितो मुण्डमालाभिः शशिखण्डविराजितः ॥ व्याघ्रस्थश्चतुर्भुजो प्रेमो मार्गः स्यान्मृग

संस्थितं ॥ त्रिकोणाम्बुजमेव स्योरार्णवार्ध्वचतुस्त्रयः ॥ ॥चतुरस्त्राजदंतींद्रपृष्ठेनापरिराजता॥ चतुर्भुजमलकारस्यमू
र्निरस्यायुसरणप्रभा ॥ अग्निकुंड्यमननकस्योद्विभुजोच्चःसितस्मन्नः ॥ कारकयात्रगाहं सर्वराणशारणकिंनिरस्तथा॥ ॥सह
समानःकृष्णाभो द्विभुजकार्मेरोध्म्रय ॥ कोटिमानःसितःसस्पार्ध्वसर्गोद्विभुजाश्रितः॥ तर्णःश्वेतानाश्विवाङःस्याधा मशी-
नांस्तुईसरः॥ पाशामयकरालार्णमूर्तिःश्वेतागजस्थिताः ॥ ॥भूविम्बशैलसंस्थःस्योद्दशबाहुर्मेरोग्रहः॥ ककारादिक्ष
कारांतस्य ध्यानं स्र्गेषां ध्यानानि॥ क्षत्रपालोमहारौद्रोविक्रमोनामनामतः॥ चतुर्भुजोमहातेजोनीलजीमूतसंनिभः भ
संकिरीटननभीमंवडमानाविभूषितं॥ गदाकाशेस्थितंवामेसूलंचक्रंचदक्षिणे॥ दानयस्माहुत्वा सर्वेंद्रलायेपूजयेत्प्रिये
॥ ॥क्षत्रपालोमहायोगीभगास्विश्वमहाबलः॥ चतुर्भुजोमहारौद्रोत्रिनेत्रोभास्वराननः॥ कपालमालाभरणोभस्मोद्धूलि
तविग्रहः॥ कार्घरणहनावामेमीनंरवड्गश्वदक्षिणे॥ दानयस्माहुत्वाःसर्वेद्वादशारेणपूजयेत्॥ हेमद्वीपाधिकारिणः
चंदनाथोमहाबलः॥ कृष्णांजननिभाकांतीक्षगरवंमहाबलं॥ अनंतपाशिनंभीमंमुंडमालाप्रलंबितम्॥ चतुर्भुजंमहा

कार्येखड्गखेटकधारिणं ॥ कायेशूलंधृतंदिव्यंकर्णिकास्थंप्रपूजयेत् ॥ जक्षराजामहाभीमा[illegible]लोकलोकदात्रिनेत्रउर्द्ध्वकेशः
श्वपमामालावलम्बि ॥ चतुर्भुजोमहाकायोकायमीनंधृतंकरे ॥ गदाश्चलोयणेदक्षेसर्वालंकारमंडितं ॥ हनयस्ताहस्तासर्वदादशं
प्रपूजयेत् ॥ ॥ सत्रपालोगणाध्यक्षोगजवक्त्रोमहाबलो ॥ नीलगौरवपुर्दायंत्रिनेत्रंचचतुर्भुजं ॥ कायंसूत्रंधृतेवामेपरसुशू
लंचदक्षिणे ॥ नागयज्ञोपवीतंचवउमालाप्रलम्बिना ॥ हनयस्ताहस्तासर्वेदादशारेप्रपूजयेत् ॥ रक्षांकुर्वन्तुदेवेशिसत्रपालोम
हामृत्युः ॥ सरदांवुदसंकाशंतडित्कोटिसमप्रभं ॥ अक्षंचतुर्भुजंभीमंरत्नमालाप्ररम्बिना ॥ कायखड्गंगवामधंसूत्रंशूलंच
दक्षिणे ॥ शान्तयस्ताहस्तासर्वेदादशारेव्यवस्थिताः ॥ ॥ नायकाउदियानेतुशत्रपालोमहाबल ॥ इन्द्रनीलप्रनीकाशोदीप्रज्वल
तुवर्चसं ॥ अक्षंचतुर्भुजंरौद्रंशंखमालाप्रलम्बिनाः ॥ कायन्दण्डोयनन्दक्षेशूलेसूत्रंचवामके ॥ शान्तयस्ताहस्तासर्वेदादशारेप्र
पूजयेत् ॥ अत्रपालोमहाजिह्वापीठेज्वालंधरेस्थितः ॥ दंष्ट्राकरालंरौद्रंचकोकिलाभंतुभीषणं ॥ महाशंखकृतामाला
आपादतलंवितां ॥ त्रिनेत्रंषड्भुजंभीमंसर्वालंकारमण्डितम् ॥ कायंमीनंतथाकर्तृवामस्थाकरदीपिना ॥ शूलंसूत्रंतथा

पाशं दक्षिणास्या विराजिते॥ शक्तयस्ताः हृष्टाः सर्वे वेतालशैनाप्र पूजयेत्॥ ॥ मरालेश्च कयादेतु महामायां बलानक टा॥ त्रिविक्र
मो महावीरः क्षेत्रपालो महाबलः॥ श्यामवर्णो महाकायस्त्रिनेत्रश्च चतुर्भुजः॥ सर्वाभरणाश्रेभाओ पीतवासा महानतुः
वसुकायं धृतं वामे गदां च कंतु दक्षिणे॥ वज्रमालाधरं दिव्यं शक्तिभिस्ताः हृष्टाः शीवृतं॥ ॥ धांक्षो नाम त विख्याते क्षेत्रपालो भ
यानकः॥ दृष्टकाक वनीकाशं भर्षं चैव चतुर्भुजं॥ उर्द्धकेशा महादंष्ट्रो रक्तानायनलोचनः॥ शंखमालागले वज्रं शूलं खङ्गं च
दक्षिणे॥ कायं खेटकवामेन सर्वाभरणमंडिता॥ शक्तयस्ताः हृष्टाः सर्वे धांक्षा रेप्र पूजयेत्॥ दकारे देवतास्तेनाकुशद्वीपे
व्यवस्थिताः॥ क्षेत्रपालो जयभद्रकुशद्वीप प्रवालकः॥ स्थूलहृस्वो महाकायो त्रिनेत्रा प्रलपाणिनः॥ कायं वामे स्थितं देवी मी
नाशवप्रपूरितं॥ भिन्नवैडुर्यो नेजातं मदिरानन्दनन्दितं॥ निर्मांसो दीर्घिकायश्च नारानिहः सुदीपितः॥ कीउनं शक्तिभि
साङ्गं कणिकस्थं प्रपूजयेत्॥ ॥ ठकारे च इमादेव्यः शाल्मलीद्वीपमाश्रिताः॥ क्षेत्रपालो दधिविक्रु महाबलपराक्रमः
निर्मांसो मांसो दीर्घिकायश्च नारानिहः सुदीपितः॥ अक्षं चतुर्भुजं रौद्रमस्थिमालाप्रलम्बिता॥ कथं चापधृतं वामे शूलं वा सां.

चदक्षिणं ॥ शक्तयस्त्वाहृशा सर्वै द्वादशारे प्रपूजयेत् ॥ कर्णनीकाकिनी देवीं उकां उकारे देवता स्थिता: ॥ अधिकारं प्रकुर्वन्ति
वीणाद्वीपे व्यवस्थिता: ॥ क्षेत्रपाली कुमारीशः महापराक्रमः ॥ दिगंबरो दंष्ट्रकूटस्तु लोचनारुणसन्निभः ॥ त्रिनेत्रं द्विभुजं
भीमं कायन्दग्रशायुतं प्रिये ॥ पुण्डरीककृता मालाभ्यां जलले विनी ॥ कोटिन्नदूतिभिः सार्द्धं कर्णिकस्थं प्रपूजयेत् ॥
ढकारे देवता देवी यवद्वीपसमाश्रिता: ॥ क्षत्रपालो महादंष्ट्रो रक्षां कुर्वन्ति साधकः ॥ वज्रनीलमहादीप्तं त्रिनेत्रं उग्ररूपि
णी ॥ चतुर्भुजं शवारूढं कपालं कर्तृ शेपरं ॥ कायं सर्वै धृतं वामे त्रिशूलं दराद्दक्षिणे ॥ शक्तयस्त्वाहृशा सर्वे द्वादशारे प्र
पूजिताः ॥ ॥ कामरूपस्थिता देवी कुर्वन्ती चाधिकारकम् ॥ करालो क्षत्रपालस्तु क्षत्रपालयते सदा ॥ दीर्घोन्नतो महाकायो वि
शालनयनो महान् ॥ कांस्यं खड्ग वामस्थं शूलं दरां चदक्षिणे ॥ अनसी पुष्पसंकाशं नानाभरणभूषितम् ॥ कोटिनश
क्तिभिः सार्द्धं कर्णिकस्थं प्रपूजयेत् ॥ ॥ तकारे देवता देवता: पुष्करद्वीपसमाश्रिता: ॥ क्षत्रपालोऽस्तु चिर्न्नाग महाबल परा
क्रमः ॥ श्वेताम्बरसन्निभाकारं सर्वलक्षणसंयुतं ॥ अभी विशालनयनो दीर्घत्वद्दीर्घनासिक: ॥ वटेन्दीवरमालाभिर्मालाकं

ध्या.मा. ५६ ऐरावराजिते॥ कार्यदक्षोग्रघंटादीप्रखड्गखेटकधारिणां॥ कौटेत्नेसहदूतीभिः द्वादशारे प्रपूजयेत्॥ ॥थकारे देवनारख्याता
के जम्बुद्वीपमाश्रिता॥ क्षत्रपालो महाध्वांक्षस्त्रिनेत्रो रक्तभास्वरः॥ चतुर्भुजो महाकायो अस्थिमालाप्रलंबिता॥ कार्यं घंटा
स्थितोवामे त्रिशूलं दक्षिणे॥ क्रूरसाहसाः सर्वैः कोडमानं विचिन्तयेत्॥ ॥दकारे देवनाराजा चन्द्रद्वीपे व्यवस्थि
ता॥ क्षत्रपाले महानन्दी त्रिनेत्रो वपुपिंगवः॥ कपिवक्त्रो चतुर्बाहुः पीतमाला प्रलंबिना॥ कार्यं मुण्डधनं वामे शूलं प
हिसदक्षिणे॥ दूतयसाहसाः सर्वैः द्वादशारे प्रपूजयेत्॥ ॥धकारे देवताख्येना पूजनीया सदा बुधैः॥ क्षत्रपालस्तु गन्ध
वगन्धर्वो वीरास्त्रलकः॥ अंतनद्वीपवासिन्य आर्तो नामार्तिनाशकः॥ नीलांजननिभंदीप्तअसंवेश्वलपाणिनम॥ पारि
पात्रकृतामालाकराउस्याच प्रलंबिता॥ कार्यं वीणा तथा सूत्रं विस्फारं तं महाबलं॥ शाकयः स्वन्वरु पञ्चद्वादशारे प्रपूजये राम: ५६
त्॥ नकारे देवतारख्याता रत्नद्वीपाधिकारिणः॥ क्षेत्रपालो महाद्रंष्ट्रो अतिदीर्घो भयाननः॥ पीनगौरेणवर्णोन रत्नमा
लाप्रलंबिता कार्यं वामे तथा यष्टि भ्रामयंतं महाबलं॥ कीडन्तं शाकिनीभिः सांकरोकस्थं प्रपूजयेत्॥ ॥पकारे देव

नाराजासाल्मद्वीपनिवासिन ॥ पुष्पदन्तेति विख्यातां क्षत्रपालो महाबल ॥ नीलगौरेण वर्णेन खड्गंचचतुर्भुजं ॥ जवापु
ष्पवना माला आपादगलमाश्रिता ॥ पुष्पदन्तेति विख्यातां क्षत्रपालो महाबल ॥ पुजयेन्कार्यकामध्यो पालकं शक्तिभिःस
ह ॥ निर्लयाच परा देवी फकारे देवतास्थिता ॥ गोमेदद्वीपवासिन्यो धनदो नामपालक ॥ लंबोदरो नीलरक्तो दीर्घो १
ष्वारक्तलोचन ॥ मुक्ताफलकृता माला आपादनतलंबिता ॥ अंशो चतुर्भुजो भीमो खड्गकार्यं धनायुतं ॥ गदाशूलं धनादसे
न्यवस्त्रपरिच्छदः ॥ बकारे देवताराज्ञः गर्भोदद्वीपवासिनो ॥ विपुले नाम क्षत्रे शोमहाबलपराक्रमः ॥ सर्वलक्षण
संपूर्णो पुष्कराक्षो चतुर्भुजः ॥ नीलमेघवपुःश्रेष्ठः कार्यकं पुष्टनौ करे ॥ त्रिशूलदक्षिणे याशं वड्ढमालाविभूषितः ॥ राक्त
यस्तादृशाः सर्वपालकेव प्रपूजयेत ॥ ॥ भकारे देवताराजा सूर्याद्वीपनिवासिन ॥ सुनन्दीनाम विख्यातः क्षत्रपालोम
हाबलः ॥ सर्वावयवसंपूर्णो त्रिनेत्रश्च वृकोदरः ॥ नागसूत्रं धृतं करे काग्रं शूलं च दक्षिणे ॥ शक्तिः कंबु धनावामे तद्दु
पैशक्तिभिर्वृतम् ॥ गंधपुष्पादिभिः पूज्यः द्वादशारे सकर्णिक ॥ मकारस्य इमे देव्य आसवद्वीपमाश्रिताः ॥ शुक्रो नाम

धा. मा.

५

नविख्यातक्षत्रपालोसदास्थितः॥ एकनेत्रोमहाघुत्कारीनाम्नाक्षत्रचतुर्भुजः॥ कुंभंकार्य्यधृतंवामेत्रिशूलंक्षत्रदक्षिणे॥ शान्क
यस्तादृशाश्चेयोगादृशोरेप्रपूजयेत॥ ॥यकारेदेवतारख्यातामहाद्देशसमाश्रिताः॥ विशालोनापविख्यातोक्षत्रपालोवलो·
त्कटः॥ चित्रांगोचित्रवर्णाभोविशालवदनोमहान॥ चतुर्भुजोमहादंष्ट्रोमहादीप्तक्षसूर्य्यधृक॥ कार्य्यंदंडंधृतंवामेशूलंचवं
चदक्षिणे॥ शान्कयस्तादृशासर्वैनादृशोरेप्रपूजयेत॥ अमृतद्वीपवासिन्यक्षत्रपालोशुभाननः॥ महावलोमहामौलीत्रि
नेत्रोशूलपाणिनः॥ रत्नमालाशिरेदिव्याकार्य्यंवामेपरिस्थितं सर्वालंकारसंपन्ननीलवस्त्रपरिछदः॥ तद्रूयाःशान्कयःपूज्या
सर्वकामफलप्रदाः॥ वकारेदेवताजेनेआनन्दद्वीपवासिनं॥ भयपालस्तुनिख्यातःनाम्नाचैववस्तुरप्रिया॥ संध्यारूपप्रती·
काशामदविघूर्णितलोचनः॥ शितपुष्पैःकृतामालाकंठस्थाचविराजते॥ कार्य्यंखड्गंवामस्यापिशितंशूलदक्षिणे॥ सर्वा·
भरणसंपन्नरक्तवस्त्रपरिछ्दयः॥ पूजयेत्करिणीकामध्येधूपदीपादिभिःप्रिये॥ ॥शकारदेवताश्चेमाकथिताश्वम
हापदो॥ गन्धर्वद्वीपवासिन्याश्विवाक्षोनामयातकः॥ विचित्राभरणादिव्यंगोरवर्णामहाद्युतिः॥ अक्षंचतुर्भुजंसौम्यंशा

राम:

५

यांवामनशेखरं॥ कायंस्रत्रं धृतंवामे शूलखङ्गं दक्षिणे॥ ध्यानयुक्ता यजन्मंत्री आह्निकेभिः कर्णिकास्थितम्॥ ॥यकारे देव
तादेवी अग्निद्वीपनिवासिनि॥ सुरानन्दो महावीर्यो अत्र पालो महाबलः॥ राजावर्तनिभं दीप्तं त्रिनेत्रं च त्रिशूलिनं॥ कायं
वामे धृतं देवि सर्वालंकारमण्डितं॥ शक्तयस्त्वाहृयाः सर्वे पालकेन समं यजेत्॥ एकारदशो देवताह्येना अंगारद्वीपवा(
सिनः॥ दुर्जयो नामविख्यातः क्षत्रपालो महाबलः॥ चतुर्भुजो महाकायो नीलमूलसंनिभः॥ नानालंकारसंयुक्तो कायखड्गाङ्कधारि
णः॥ शूलपाशं धृतं दक्षे दीप्यमानं महौजसम्॥ कुलद्वीपेतु वासिन्यो हकाराक्षरसंभवाः॥ प्रद्युम्नो नामविख्यातो क्षत्र
पालो महाबलोपि॥ मकुंडेनुवर्णाभं त्रिनेत्रं च चतुर्भुजं॥ किरीटिनं त्रुंडलिनं वज्रमालाविभूषितं॥ गदाकमण्डलुं धृतं वामे शूलं
चक्रंतु दक्षिणे॥ नानावर्णाम्बुजाताय महादीप्तिसमुज्वलम्॥ शक्तयस्त्वाः सर्वे पालकेसहिता यजेत्॥ ॥क्षकारे देवता राज
नगद्वीपाधिवासिनः॥ भद्रपालो महाकायो महाबलपराक्रमः॥ कज्जलां जिननिभाकारं महादीप्तं करालिनं॥ अक्ष चतुर्भु
जं भीमं ग्रसन्तीव चराचरम्॥ कपालमालाभरणं कायखड्गाङ्गधारिणं॥ त्रिशूलं दक्षिणे पाशं शक्तयस्त्वस्य ताहृयाः॥ पूज

येन्कर्णिकामध्येसाधकायवरप्रदा॥ ॥महाकालस्यध्यानं॥ वचनस्यमहाकालं कृष्णवर्णं त्रिलोचनं॥ दक्षखड्गपेदृकंच
दमरुं खट्वाङ्गधारिणी॥ कर्त्रीकपालहस्तंच त्रिशूलपात्रधारिणी॥ प्रेतासनमहाकायमुण्डमालाविभूषितं श्मशानमा
सिनं रुद्रं नग्नरूपनमाम्यहं॥ महाप्रेतासनारूढं रक्तकृष्णसुतेजसं॥ एकास्यचत्रिलोचनभीमंवर्वरोर्द्धशिरोरुहः॥
पिङ्गाक्षभ्रुलसत्केसंमहाकायमहोदरं॥ व्याघ्रचर्मपरिधानांगजचर्मस्वरीयकं॥ रत्नसप्पार्थलंकारंनोपुरादिविभूषि
तं॥ खड्गफेटकपात्राणिबिन्दुखट्वाङ्गहस्तकं॥ विद्युत्कोटिमहातेजंकवन्धहारभूषितं॥ ब्रह्मविष्णुसुरुद्रानांशिरमाहरस्
पादुकां॥ शमिवासञ्चफेत्कारगृध्रेसृकराकलं॥ भूतप्रेतपिशाचानांकिकिलापरसंश्मशानेचमहारौद्रंयोगिनीगणा
मण्डितं॥ नमामानंमहादेवंलोकानांहितकारणं॥ नमामिश्रीमहाकालंभैरवंभुवनेश्वर॥ यःपठेत्श्रृणुयावापिश्र.
त्रुरोगविनाशनं॥ सर्वसिद्धिमवाप्नोतिसदाविजयवर्द्धनः॥ चतुर्वाहुत्रिनेत्रंचखड्गखेटकपालभृतं॥ त्रिशूलाक्रम
हाकालोद्वारेचैवामतश्विनः॥ ॥चतुर्वाहुर्विशालाक्षःपीनाङ्गश्चमहोदरकुर्चवान्पिङ्गकेसश्चमुण्डमालात्रिलोचनः॥

तन्करेसिन्नकं याम्य श्मलखेटं चवामके ॥ हालगात्रो महाकालो द्वारे वै वामतः स्थित ॥ ॥ शिखास्वछन्दकस्य ध्यानं ॥ शिखाना
थं महादेवं कर्णिको परिसंस्थितं ॥ प्रेतासन गतं देवं श्वेत वर्णास्तु शोभितं ॥ दंक्षिणे रक्तवर्णा च पीतं तस्तु नर शोभितं ॥ एष्टे
च नीलं नीमूतं चतुर्वक्त्रं महेश्वरं ॥ द्वादशैत्रयनेयुक्तं ईपद्रंष्ट्रा ननाम्बुभा ॥ पिङ्गलस्तु श्मश्रुकेशं महाउग्रा भयापहा ॥ रक्ताकरन
रा चैव खर्वो लम्बोदरात्मिकं ॥ वज्रज्वालागता ज्वालो महाज्वालोस्तजाज्वलं ॥ ज्वलं निलायुध सर्वं ज्वलज्वा विराजिते ॥ दशबाहुम
हादेवं खड्ग फेटक धारकम् ॥ शरधनुर्द्धरं चैव अङ्कुशं पाशधारकं ॥ वराभय पदं देवं पात्र खट्वांग धारणं ॥ एवं दशभुजं देवं
शयोजन विस्तरम् ॥ शरीरं व्याप्य रूपाणि सर्वं पाशानि कारकं ॥ ॥ पंच वक्त्रं दशभुजं त्रिपंच नयनोज्वलं ॥ जटाजूट धरं दिव्यं क
र्णकुण्डल मंडितं ॥ त्रिशूलं वरदं पाशं खड्गं कारिं ग रि दिरो ॥ अभयं दर्पबीज पूरं सदाशवकम् ॥ वामेन वायुधा नूदिव्यानूना
नालंकार संयुतं ॥ सर्वाभरसोभाढ्यं नानारत्नै स्तु मण्डितं ॥ गोक्षीर वर्ण संकाश हिमकुण्डल सन्निभं ॥ सर्पराजोपवीतं च रत्न
माला प्रलंवितं सर्वावयव संपूर्णं सर्वलक्षण लक्षितम् ॥ एवं ध्यात्वा वरारोहे शिवं परमकारणं ॥ शिखास्वछन्द देवेशं तन्त्र

गास

ध्या.मा. स्याप्यो परिपूरयेत् ॥ ॥ पंचवक्त्रं महातेजं त्रिपंचनयनोज्वलं ॥ दशबाहुं महाभीमं नानाशृंगारमम शितं ॥ नानाभरणां
५९ संयुक्तं हारनूपुरमण्डितम् ॥ जटाजूटधरं दिव्यं चन्द्रार्द्धकृतशेखरं ॥ गोक्षीरधवलं दिव्यं फेनाभं शुक्लवर्ज्रसं ॥ पूर्ववक्त्रे
ध्यायेन्महादीप्तिकरं प्रिये ॥ दाडिमीकुसुमाकारं दिव्यं पश्चिमे वराउसुन्दरी ॥ दंष्ट्राकरालरौद्रं च किंचिद्धास्यानेक्ष
णां ॥ दाडिमीकुसुमाकारं बन्धूकपुष्पसंनिभं ॥ तरुणादित्यसंकाशं वामवक्त्रं विचिन्तयेत् ॥ पीताभं पीतसंकाशं कुङ्कुमाभं
सुलोचनं ॥ महादीप्तिकरं दिव्यं पश्चिमे वरानसुन्दरी ॥ दंष्ट्राकरालरौद्रं च किंचिद्धास्यानेक्षणां ॥ नीलोत्पलदलश्यामं नीलाञ्जनं
समप्रभं ॥ मणिसर्प्पैकृतानेकं पिङ्गकेशं सुभीषणं ॥ अघोरमितिविख्यातं ध्यानं सर्वार्थसिद्धिदं ॥ ईशानं पूर्ववक्त्रं तु सु
विरूपं परात्परं ॥ हिमकुन्देन्दुसंकाशं शुद्धस्फटिकनिर्म्मलं ॥ अप्यायन्तं जगत्सर्वं चन्द्रांशुनिकरेण तु ॥ वर्षन्तं सुमहोघेन राम:
धारावीमृषसंनिभं ॥ ईशानं ध्यायमानं तु अणिमादिगुणालभेत् ॥ त्रिशूलं कर्तरी खड्गनागराजाक्षसूत्रकं ॥ दक्षिणे नव ५९
रारोहे विराजन्त्यायुधानि मे ॥ कपालं च महद्राक्षि पाशाङ्कुशधरं प्रिये ॥ वामेन आयुधा दिव्या दिव्यमानाशुशोभना ॥ सर्व

राजेन्द्रनीलरक्तश्वेतवर्णा मालेवस्तुदरौ ॥ करोठरश्मिकरास्वैकरौगौरासनन्दिनौ ॥ महापद्मासनासीनं कठिनं खलसन्दितं
सद्र्घरिकशोभाढ्यौ रत्नमालाविभूषिता ॥ पादौ नूपुरसंयुक्तौ कौस्तुभमालास्वलंकृतौ ॥ अनन्तासनमासीनेन महाष्टकसनि
भं ॥ सप्तकोटिस्तुमंत्राणां मनन्तासनसंस्थितं ॥ नाराहिमनिभं दिव्यं ब्रह्मांकमिव शोभये ॥ ॥ कर्णिकोपरि दीप्यन्तं प्रज्वल
न्तं महोज्वलम् ॥ अनन्तं तहिजानीयात तस्यार्द्धं नाशिखाशिवं ॥ अष्टपत्रामासीनं द्वात्रिंशार्द्धिभिरावृतं ॥ नानालंकारसम्पन्नानाना
भवर्णविचित्रयेत् ॥ दशबाहुं महाघोरं चतुर्वक्त्रं सुलासं ॥ सर्ववर्णधरां देवीमथरूपामाविचिन्तयेत् ॥ कपालं चैव खट्वां
गं खड्गं परशुशूलधृक ॥ डमरुं चाक्षमालं च फलहस्ते निवेशयेत ॥ गजचर्मधरौ चोभौ हस्तौ नुपरिकीर्तितौ ॥ गजेन्द्रविभी
षणां नादं सर्वकारणकारणं ॥ भक्तानां चिन्तयेद्याधिविश्वेश्वरमहेश्वरी ॥ खायमानारनंतानां नानाश्मानादिभेदितां ॥ भेदय
न्ति त्रिशूलेन छेदयन्तो महासिना ॥ कुड्मभान्ताधनतोनां एवं व्याधिविचिन्तयेत् ॥ तस्यापरि तमैकारं नूतनत्वेनावचेष्टितं ॥ शि
खास्वच्छन्ददेवेशं तस्याधो परिचिन्तयेत् ॥ ॥ नृसिंहस्य ध्यानं ॥ नृपाहूत्वासनन्दं वै मेकवक्त्रं त्रिलोचनं ॥ श्वेतवर्णम

आ.भा.
६०

हादेशनामकुण्डलमण्डितं ॥ जटाजूटशशिचूडं घोरभुजशोभितं ॥ ऊर्द्ध्वबाहुनृत्यरूपं डमरुं त्रिशूलं तथा ॥ त्रिदशिसर
वज्रंचकर्णिकाअक्षदक्षिणे ॥ तथावामेनृत्ययंचखट्वाङ्गपद्ममेवच ॥ नागन्धनुतथाघण्टकपालंचकमण्डलुं ॥ सहस्रसूर्यसं
काशंकालाभिन्नेनृत्ययंनिच ॥ नृत्यगीतालयन्देवंनाण्डवंविश्वरूपिणं ॥ भैरवंनृत्यरूपेणसर्वालंकारशोभितम् ॥ एवंध्यात्वाम
हादेवंनानकार्यसुसिद्धयेनु ॥ मानवानांहितार्थायसर्वदुरितनाशनं ॥ एकवक्त्रंत्रिनेत्रंचनागकुण्डलभूषितं ॥ जटाजूटंच
न्द्रखण्डगङ्गामुण्डास्थिसोभितं ॥ शुद्धस्फटिकसंकाशंश्वेतवर्णंसुशोभितं ॥ कर्पूरभूतिविमलैलेपितंगात्रमुज्वलं ॥ हाडालंका
लभूषाङ्गंमुण्डमालाविभूषितं ॥ नागयज्ञोपवीताङ्गविचित्रसुविराजितं ॥ व्याघ्रचर्मपरीताङ्गसिंहचर्मोत्तरीयकं ॥ द्विरष्ट
बाहुविध्वंतंनाण्डवंपरमेश्वरं ॥ ऊर्द्ध्वबाहुनृत्यमानंत्रिशूलंडमरुंतथा ॥ त्रिदण्डखरवज्रंचकर्णिकांचाक्षमालिकां ॥ तथावामेनृ
त्यरूपंखट्वाङ्गपद्ममेवच ॥ नागंधनुतथावामेनृत्यरूपंखट्वाङ्गपद्ममेवच ॥ नागन्धनुतथाघण्टकपालंचकमण्डलुं ॥ धा
रयन्तंजगन्नाथंजगत्कर्त्तारमव्ययं ॥ सहस्रसूर्यसंकाशंकालाभिन्नेचनृतये ॥ करांचिद्रूपभाखण्डंनृत्यगीतलयान्वितं ॥ वाद्य

राम:
६०

४०

मानन्दिकेशंमहाकालंचकामकं॥ गंधर्व्वकिन्नरगणैर्द्देवासुरमनोरसैः॥ गायमानैःसुरैसुक्तंवाद्यमानैर्लयागतं॥ आनन्दशक्ति
संयुक्तंअप्सरोगणसेवितं॥ भैरवंनृत्यरूपंचसर्व्वालंकारशोभितं॥ नृत्यमानंमहादेवंसर्व्वदेवगणैर्वृतं॥ एवन्ध्यात्वामहादेवं
नाटकार्य्यार्थसिद्धये॥ पूजयेन्नृत्यनाथंचहस्तमन्त्रेणसंयुतं॥ ॥ एकवक्त्रंत्रिनेत्रंचनागकुण्डलसंयुतं॥ जटाजूटशशीचूडंचं
नवरौंसुजाज्वलं॥ चन्द्रभुजाकलाकानानारूपंपरमेश्वरं॥ ऊर्द्धबाहुंनृत्यरूपंडमरुंशूलमेवच॥ त्रिशिखंशरवज्रंचकर्त्तीं
कामक्षमालिकां॥ तथावारांनृत्यरूपंखट्वाङ्गंपद्ममेवच॥ नागधनुस्तथाघण्टाकपालंचकमण्डलु॥ सहस्रसूर्य्यसंकाशं
कलाभिन्नंचनृतये॥ वृषारूढासमास्थायनृत्यगीतेनसंयुतं॥ भैरवंनृत्यरूपंचसर्व्वालंकारशोभितं॥ एवन्ध्यात्वाम
हादेवंनाटकार्य्यसुसिद्धये॥ मानुवानांहितार्थानांसर्व्वदुरितनाशनं॥ ॥ पीणाङ्गयौवनाङ्गिन्नवक्त्राबाहुस्त्रिलोचनं॥ सौ
म्यंप्रहसितास्यंचचन्द्रमौलिजटाधरं॥ व्याघ्रचर्म्मांशुकंकृत्तंव्यालयज्ञोपवीतिनं॥ नागेन्द्रमेखलायुक्तंसर्व्वाभरणम
ण्डितं॥ ऊर्द्धमेन्द्रमहादीप्तमेखाशाकिरणोस्थितं॥ नृत्यंचमहाहस्तमायुधानुशापाशिनं॥ दशशाशिशक्तिम्शूलानिवि

भ्रान्दसिरोकरे॥ वलनोकारकवाहुमहादीप्तकादिस्थितं॥ कपालं चैव खट्वांगगेटकश्चागमायकं॥ वामे प्रहरितभुजं सम्य·
क्कृत्वा तु शोभनं॥ कपालमालिनन्दिस्यं तु प्रशान्तस्तु भूषितं॥ सर्वज्ञानिकारं कुर्यान्हेवासुरसमाहृतं॥ स्कन्दनन्दिमहामह
कालगणेशगणासंस्थितं॥ कुर्यात्पाश्चाप्सराभिश्च वृत विद्याधरादिभिः॥ मानन्देरूपश्चैवी समारोर्म्मेहेश्वरैः॥ विद्यावरपरि
धानैः सर्वाभरणभूषितं॥ नरश्रेष्ठ प्रनृत्तो च भृंगाकार्यः कृशो भृशं॥ पुरः प्राङ्गाध्यनोऽनचदीप्ताङ्गी सौम्यरूपिका॥ विरू
ता तीक्ष्णनाशांश्च चौराश्च त्यादिपराक्रमान्॥ यथार्कस्य भवेद्रूपमादिमध्यान्तसंस्थितं॥ हरश्चैवभुवैन्तुवीत आस्याने फलप्र(
दा॥ ॥नवरसानां ध्यानानि॥ ॥शृंगारस्य ध्यानं॥ उन्मीरं नवनीलनीरजवपुसोद्दपसारेस्य॥ खेलत्खंजनलोचनस्तु ललि(
तः कंदर्प्पलीलालयः॥ ज्ञेयः सोऽश्रहापनप्रविलसन्यांजाम्बर॥ कुण्डली साक्षाविस्फुरयंमहावललयः॥ ॥शृंगारनामोर
सः॥ ॥हास्यकस्य ध्यानं॥ शिनं पुरारेस्वकुलोद्भवासौः चापल्ययुक्तो वहु भावजातः॥ विचित्रवासाः प्रचलद्धिनेत्रो हास्याभि·
धानः शिवतोरसःस्यात्॥ ॥क्रोधस्य ध्यानं॥ प्रस्फुरद्धवश्रुकंसमः प्रचण्डः स्वकाङ्कशोवाराणधनुर्द्धरश्च॥ दैत्येन्द्रवंशोद्भ·

ववीरभूषाविभूषणाक्रोधरसःप्रसिद्धः॥ ॥वीरस्यध्यानं॥योनारविन्दाक्षगौरदेहकान्तिस्तुवावलिस्रोनृपभूषणाढ्यः॥राजा
न्यवंशोत्सुरराजदेहःश्रीमान्महोत्साहयुतःसवीरः॥ ॥विभत्सस्यध्यानं॥भिन्नोजनाभोविघ्नरणोविलज्जःपंचाशदन्दान्व
यहृदयस्कः॥वीभत्सनोमाहृष्यलान्वयोयंरसोमहाकारोहितंःप्रसिद्धः॥ ॥भयानकस्यध्यानं॥पंचाशदवोनिजम्भःशूद्रा
न्वयेभीषणरूपधारि(कोलाधिनद्धविरधीरलो) कालाधिदेवःकथितःकवीन्द्रैर्भयानकोसौचयलङ्कजन्मा॥ ॥रौद्र
रसध्यानं॥कांचनद्धविरधीरलोचनेसुंदरस्वपरमेष्ठिदैवतः॥पश्चविंशतिकहायनस्मृतोवैश्यवंशइहरौद्रम(
तुतं॥ ॥करुणास्यध्यानं॥शोकान्माकरुणोरसस्तनभृनांव्यामोहसंपादकोनिभ्नोनोनिजगोचरान्तरगतोनिर्वेदका(
रोभवेत्॥पुत्रप्राणविनिताम्बिनीविनिभवस्त्रायोपहितोयः॥पुनर्दीनालोकनरोदनश्रवनतानिर्वेदमोहात्मकः॥पंचाधिकं
त्रिसविंवर्षसंख्यचयः॥कपोतांगरुचिर्धिरूक्षः॥स्वजान्वयोचंयमदेवश्वरसःप्रसिद्धःकरुणेकवीन्द्रैः॥ ॥अट्टहास
भैरवभैरवीकस्यध्यानं॥ज्वलज्जास्तुनदाकारोसूर्य्यकोटिसमप्रभा॥नानाश्चर्य्योरणभरणानानाहेमनयनोज्वला॥नो

नाहेमाम्बरधराहेमचन्द्रसन्नोन्नरा॥ हेमाङ्गकलशहस्ताहेमनुपुरनिस्वना॥ नवश्रीमन्नरचितानीलकुञ्चितमूर्द्धजा॥ सुदी
र्घांवेशिशारगारुकामालाशनोज्वला॥ नवचालेयदशनासस्मितंतुधराननाः॥ सुगनेत्रसुजादेवीमुक्ताहारसुमध्यगा
सुमेवंनामतत्त्वानांकलत्रमृत्तयौवनाः॥ पूजयेद्देवतांवामेदिव्यकामफलाप्तये॥ महानिफणिआरूढोमहाहासेति
विश्रुतं॥ भैरवोदक्षिणांदेव्याध्यायेनजगराःपिताः॥ दशशीर्षशतभुजोसहस्रफेणभास्वरं॥ शंखचक्रगदापणिंपद्मनो
नासिपादपम॥ खड्गवीणामुशलास्फेटत्रिशूलोक्षमलोधिवौ॥ हरःकमण्डलुःपाशोज्वालाशक्तिर्द्धनुर्द्धरः॥ सूर्यामृतपु
टंशोषानवपालेयवर्चसा॥ नतनेत्रेहितन्त्रथकशांकरसुस्वरूपिणं॥ सिंहशूकरंसभिन्नंक्रमलंनस्याङ्गवाजिनं॥ एवंसत्र
हस्रसारख्याविश्वमूर्तिपरोक्षरः॥ स्वासनसतमासीनोसूर्यकोटिसमप्रभ॥ यन्नमध्यसरोध्यायेभैरवोभैरवेश्वरः॥
वंकालभैरवस्यध्यानं॥ वृतमेनुन्मुवश्यामिनान्याकंकोलभासुरं॥ पंचोत्तापिण्डसिद्धिस्यासाधकस्यमहात्मनः॥ कायस्व
ण्डकैनैवमुण्डमालांसुचर्चितां॥ प्रतिखंडकरंकाकंनेभन्वामूर्द्धिधारयेत॥ खट्वाङ्गंछिद्रसंपूर्णमहाचामरशोभितं॥

वीराक्षिं कनिसंयुक्तं सुदंष्ट्रं हट्टमव्रणं ॥ धारयेद्वामकरे नानानाशोभासमन्वितं ॥ कर्णाभ्यां कुण्डिके कार्ये नरास्थिघटिते शु
भे ॥ कण्ठमालामस्थिमयां लटासप्तकभूषितं ॥ प्रलम्बन्तं महाहारं तद्देवधरं नरः ॥ कार्यन्दक्षिणहस्तस्थं सुरामयादिए
रितं ॥ मेखलास्थिमयाकार्या सुराण्डसुरण्डविभूषितं ॥ किंकिणीभिः समायुक्ता नरकेशसमन्विता ॥ मध्ये नरमणीन्स्याकर्णं
कंकुलिशो दसि ॥ नूपुरावस्थिरचितौ सूक्ष्मकिंकिरिचित्रितौ वीरभस्मसमालिप्तो सायवीनसमाहितः ॥ मदिरानन्दचेत्र
न्तो सुगन्धकुसुमान्वितं ॥ ताम्बूलवक्त्रं सस्यनो मदपूर्णितलोचनः हसेद्वाम्रगरीरं यर्यटेन समन्वतन ॥ कापालिको र
क्मिकं कालीरश्मिमेनायलोलुटा ॥ सर्वभक्षोपि पंचास्ति वीरवक्त्रोम्बरो सह ॥ ॥ हनुभैरवस्य ध्यानं ॥ वन्दे मारुतनन्द
नं जनकजाशोकाग्निकालांबुदं ॥ कालागारनिवासिनी सरवधूने नाम्नुना शाश्वरं ॥ नियमङ्गववधरोधनिगलद्यानादिः
शंसुकयेहेमाम्भोरुहकशरस्तु निमहत्केशाभिरामं विभु ॥ ॥ ध्यायेत्कालदिवाकरद्युतिनिभं देवारिदर्पापहं देवश्रुप्रमु
खप्रशस्तयशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तनानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीताम्ब

रालकृतं ॥ विरूपारूणालंखचडूर्द्धप्रशुद्ध्रमुज्वलं ॥ आलोधरकरस्नसन्नामरूकायं तु भीषणं ॥ दीर्घदंष्ट्रानखैर्यु
क्तपिंगाराभूषणाचितं ॥ पीनध्वजधरस्वामी नग्नजनीवाहरायत: ॥ प्रसारितं भुजं कुर्याद्वह्निहस्तं तु दक्षिणे: ॥ समीप्य रा
क्षसान्याभ्यां सुंचनादमकृन्तुन: ॥ ॥ज्ञानिभैरवस्य ध्यानं ॥ ध्यामे पंचाननं पंचदशनेत्रं तु भीषणं ॥ दशबाहुं रौद्रभूषं
श्वेतानन्यासनस्थितं ॥ कायत्रिशूलडमरूवीजपूरं च दक्षिणे ॥ खड्गाङ्कपरमेसम्बभयं विज्ञाणं वामबाहुस्तु ॥ शेषा
बाहुद्वयेनैव विधृतं गजचर्मकं ॥ इत्थं ध्यात्वाग्निखेद्यानं ततोजयनमारभेत् ॥ सोमेशभैरवस्य ध्यानं ॥ सितश्चतुर्भुज
स्त्यक्षकजस्थायरणांविन: ॥ वराभयकपालाब्जजेटेन्दुजिनमागभृत् ॥ कारासोमेश्वरो रक्तोचतुराशोसवाहुके ॥ दक्षिणे
शूलनिस्त्रिंशकुठारामयधारक: ॥ घराटकमालखट्वाङ्ग पाशहस्तस्तु वामके ॥ मुण्डमालाशवारूढोड्रेनाङ्गेनेकमो राम:
मन: ॥ ॥अघोरघरोठव भैरवस्य ध्यानं ॥ नन्त्वर्ध समासुक्ते कुलिशोमुद्गराधिकं ॥ कुर्याद्घोरघण्टेशादिहस्तभुजम ८३
लिङ्गतं ॥ भयस्वक्रमहाकायादिग्वर्णा जितलोचनं ॥ उपविष्टसदाक्ष्यं सर्वकामप्रदायकं ॥ अभ्वकानभैरवस्य ध्या

नं ॥ उर्द्धालीढस्थित अर्द्धेन्दुस्वरूपमध्ये च वज्रकं: ॥ अष्टादशभुजं कुर्याद्वरदाभयवर्ग्गितं ॥ पाणिद्वयस्य सस्थलसंभिन्नां चक्र दा
नव ॥ घण्टा डमरुश्चैव कुठारमुद्गरं तथा ॥ धारयन्तं पुरंदरस्था भैरवं तमन्धकारकं सर्वशत्रु हरंति त्यमानृभिः परिवारितं ॥ ॥
कुमारभैरवस्य ध्यानं ॥ अक्षश्वेतोलिखर्वेश्च स्थूलमूर्द्धोरुकुक्षिक: ॥ दशनिकरशकोपेनःकुष्माण्डः पूर्वमाननं ॥ ॥ ष्माण्डभैरव-
स्य ध्यानं ॥ उग्रतेजाः शितोरौद्रकरालारक्तहस्तयः ॥ लेलिहानशिनेकुक्षाजटासर्वेङ्गमण्डितः ॥ दंष्ट्राकरालः पीनांगो वृद्धत्रायोन्तसं
स्थितं: ॥ अष्टादशभुजो भीमोज्वलदायुध पाणिकः ॥ वज्रशीद्दण्डचक्रेषुसशूलांकुशालांकुशमुद्गरैः ॥ विघ्नदक्षिणे हस्तैश्चपाशार
गसभः स्थितः ॥ तर्जनी खेटकं शक्ति कपाल पाशकार्मुकं ॥ घण्टांकुशा रक्तमविभुदाभ्यां त्रिशूलकं ॥ परशुकर्णविधानवो
परशभूषणभूषितं ॥ घराटमालाकुलो देवीपुष्पलीका जिनाम्बरः ॥ ॥ रेवनभैरवस्य ध्यानं ॥ अथ स्क्टोमुककार्यो द्विकरस्याहगात्रक
कृपुर्वीमारकाहृत्तारत्नाभो भूषणाचितः ॥ वामे वरो पाणि स्याद्दक्षिणे मध्यपात्रकं ॥ पालयोशान्कारे वन्हद्वत्र धाराप्रदिर्भियोतत् ॥ ॥ भै
रवस्य ध्यानं ॥ भैरवश्चार्कसंरम्भाभ्यां च सुरस्पोजेठउक्ता ॥ रक्तकुरक्तुठारेषु विश्वामयहवाहकन ॥ चापत्रिशूलखड्वांगयाश

कार्द्दकरोन्यतः॥ गजचर्म्मधरोदाम्भांकृतिवासोविभूषितः॥ अक्षोदंष्ट्राकरालास्यः प्रचण्डाट्टहासवान्॥ मुण्डमालाधरोमुण्डकपा
लमालिनः॥ कूर्म्मधरास्तुयनाङ्गप्रेतहृदासनस्थितः॥ चराज्ञखोमानृमध्येसंस्थितंपीनकूर्चवान्॥ लम्बोदरःखुसंभ्रान्तोवृत्तिपिंग
ललोचनः॥ दंष्ट्राकरालवदनोमुद्धनासापुटस्तथा॥ कपालमालिरौद्रश्च सर्व्वतःसर्प्पभूषणः॥ मरणालाम्बुदकसंकासोगजचर्म्मोन्न-
रच्छदः॥ त्रिनेत्रोयंचतुर्वाहुःसर्वेषुधविभूषणः॥ वृहद्दूलप्रतिकाशस्तथानीक्ष्णनखस्तुभः॥ साचोक्तमिदंरूपंभैरवस्यप्रकी
र्त्तितं॥ ॥तथाभैरवाचाराणांस्कन्गोरश्चतुर्भुजः॥ नधापयंचवशकिंचचकंवागीकरेषुच॥ विभूदेव्याःप्ररोगाखांपुजयंविरूपतः॥
शुद्धस्फटिकसंकाशंचन्द्राभंचन्द्रवर्चसं॥ नारानिक्षमयन्दिव्यंहिमकुन्देन्दुसन्निभं॥ पंचवक्त्रधरन्देवंत्रिपंचनयनोज्वलं॥ महाव्या
घ्रिधरन्दिव्यंजटाजूटेनमण्डितं॥ रत्नशेखरसन्दीप्तंकर्णकुण्डलभूषितं॥ पंचवर्णधरवक्त्रंईषद्दंष्ट्राविराजितं॥ नागयज्ञंहास्यमधु
रंकटाक्षंतिस्रालोचनं॥ दशवाहुर्म्महातेजानागयज्ञोपवीतिनं॥ कपालखेटकचर्यंखट्वाङ्गंदर्प्पणंप्रिये॥ वामेनआयुधान्दिव्यान्द
क्षिणोचननन्तःश्टणु॥ खड्गंवाणंतथासर्प्पत्रिशूलंवरन्दतथा॥ दक्षिणेनकरेदेवोदिव्यमानायुधाप्रिये॥ नानाभरणसंयुक्तानाना

लंकारभूषितं ॥ पद्मासनसमासीनसमासीनावृषारूढस्तुनजसं ॥ एवन्ध्यात्वामहादेवंभैरवंमानमध्यगं ॥ ॥शुद्धस्फटिकसंका
शंषड्भुजंवादरशायुधं ॥ भैरवाभंशूलचक्रांकुशपाशंसरेवरं ॥ वामकेतर्जनीशंखंधराहस्तेपिसन्दधम् ॥ चापाभयंचविभ्राणांनङ्ग
देवकुलेश्वरी ॥ चतुर्भुजारक्तवर्णारक्तवस्त्रविभूषितां ॥ दक्षिणोर्द्ध्वभुजेचाधोविभ्रतीपुस्तकोत्तमं ॥ अभयंवामहस्ताभ्यांवरंचदधती
तथां ॥ सहस्रसूर्यसंकाशांत्रिनेत्रागजगामिनीं ॥ पीनस्तुंगस्तनयुगांसितपद्मासनस्थितां ॥ स्मितप्रभिन्नवदनांसर्वालंकारसंयु
तां ॥ निर्मुक्तस्मुण्डमालाभिःशोभितवक्षकतिंसुच ॥ त्रिगुणींत्रिगुणीभूतैःअनेकंपरिभूषितां ॥ मदिराघूर्णनयनांरक्तदंतस्थद्हृदयं:
चिन्तयेद्भैरवेत्तदेवीमेवंत्रिपुरभैरवीं ॥ ॥शुद्धस्फटिकसंकाशंचतुर्बाहुंकिरीटिनं ॥ शूलंकपालंदक्षेतुवामेतुपाशमंकुशं ॥ सुरापा
नरताविस्त्रंसाधकाभीष्टदायकं ॥ ॥जालंधरपीठभैरवस्यध्यानं ॥ ॥त्रिनेत्रंयत्नभुजंदिव्यंमुकुटैःकुण्डलभूषितं ॥ कात्यायनिस्थल
खड्गाङ्कवामभागेविराजतें ॥ अंकुशंशक्तिवज्रंचदक्षिणेनकरायुधा ॥ नानालंकारसम्पन्नोनानारत्नविभूषितं ॥ स्थिरत्नम
धीमालामापादतललम्बिता ॥ सर्वरस्थानसंपूर्णसर्वावयवसुन्दरी ॥ त्रिनेत्राचतुर्भुजादेवीवरदाशक्तिपाणिनी ॥ पाशाकुशधु

यादेवीनानाकुसुमदामसमर्चितं॥ सर्वलक्षणसंपूर्णा सर्वाभरणभूषिता ॥ त्रिपुरभैरवस्यध्यानं॥ महादेवीप्यतेजोढ्यंनीलजीमू
तसन्निभं॥ कालानलसमाप्रख्यंदीपयतंनभंस्तुलं॥ घाटयतंजगत्सर्वंसूर्यकोटिसमप्रभं॥ पातालाकाशसलग्नंग्रसन्निस
चराचरं॥ पंचवक्रदशभुजंत्रिपंचनयनोज्वलं॥ कार्त्रंखड्गंनागंचदर्पणंचरूकौशिकवामभागेस्थितादेवीआयुधादिव्य
रूपिणः॥ त्रिशूलडाकिहसंचनस्यवज्रंचदक्षिणे॥ मुण्डमालानलरीणंलेलिभांतुमहत्राह॥ व्याघ्निनिजगन्नाथंपर्कशकुल
कोद्भवः॥ ॥सम्वर्तभैरवस्यध्यानं॥ कालानलप्रतीकाशंसर्तांशिपुष्पसंनिभं॥ राजावर्तप्रतीकाशंकुमुदसमप्रभं॥ पिंग
केसंमहारौद्रंआरक्तायतलोचनं॥ त्रिशिखन्वादशभुजंत्रिनेत्रंजोलनप्रभं॥ कार्त्रेखड्गगनागंचपिनाकंखेटकंतथा॥ त्रिशिकिदिव्या
मस्रोपाचनामभागेविराजते॥ वरदवज्रस्तंचडमरुखड्गंदरान्तरे॥ त्रिशूलंदक्षिणेदेविकालानरःसमप्रभं॥ कायमानाशिरेजस्य
सदत्तासविताननं॥ किरीटरत्नखचितंवज्रकुण्डलमण्डितं॥ बृहद्दृशस्थलेसोगनानाभरणमण्डितं॥ प्रेतारूढंमहायंचैवा
घ्रचर्मपरिच्छदं॥ स्वशक्त्याधिस्थितंकोप्यमानंस्तुनजसं ॥ भिन्ननीलांजनप्रख्यंत्रिथितेत्रंदशानिकं॥ लसदंष्ट्राकरालंच

वर्द्धरोर्द्धशिरोरुहं ॥ द्विरष्टवर्षदेशीयारक्तस्वर्णास्थिचर्चिसः ॥ यावद्भ्रूपरांसंयुक्तमेकपादसवस्थितं ॥ पंचाननासनवद्धोनाभि
पद्मोयलोचकं ॥ मुण्डमालाविनागेचगन्धादिकुसुमार्चितं ॥ भालाभृवङ्गकहारकोटिकांचिपदार्चितं ॥ अस्यदक्षिणादोर्द्दण्डेशखा
णोविविधधानिच ॥ शूलंचक्रन्ध्वजादानंदयावामेपरं शृणु ॥ पारिजाततजाप्यमालापुस्तकंचाभयंप्रिये ॥ शेषाभ्यांचैववाहुभ्यांव्या
घ्रचर्ममिदारणं ॥ ततोस्यनिभस्तोकंतुरीयेयोनिमध्यतः ॥ ध्यानद्वाशिभसंभूतंदेवीरूपामनन्यधीः ॥ स्वात्मानंमूलकुलोककु·
र्यासम्यविभावयेत ॥ ॥ शैवेश्वरस्यध्यानं ॥ श्यामवर्णोरविभुजंवरखड्गंचकशोभितं ॥ दंष्ट्राकरालवदनोभैरवाभरणोविभुः ॥ म
हासवासनस्थोयंमातृमण्डलमध्यगः ॥ सर्वतत्त्वेश्वरश्रीमान्सर्वाश्रमेसुपूजितः ॥ शूलंचक्रंतथाखड्गमंकुशंवरदंतथा ॥ वि
भ्रद्दक्षतथावामेखट्वाङ्गफर्शमेवच ॥ गदापाशंचाभयाख्यंबाहुभ्यांगजचर्मकं ॥ दीपेश्वरविभान्याथततःसूर्याक्षरेस्मरेत ॥ अ
वमाणिपूरिणापूरकसंज्ञालिंगचक्रकमे ॥ देवींचदलपूर्णाभास्थितांचक्रायतोपरि ॥ शंखचक्रगदापद्ममुसलपाशवराभये ॥
नवात्मेश्वरस्यध्यानं ॥ सत्वतेस्वरतुल्यस्तुदेवोललितविग्रह ॥ भिन्ननीलांजनप्रख्यासितिथिनेत्रन्रक्षाणिकं ॥ लसदंष्ट्राकरालंच

ध्या·मा·
६६

वर्वराङ्गशीरोरुहं ॥ दिरसे वर्वदेशीयारत्नस्वर्णास्थिमर्चिन ॥ यावद्भूषणासंयुक्तमेकपादमवस्थितः ॥ पंचाननासनेभूमिनानि·
पद्मायुलीयकं ॥ मुण्डमालार्चितांगं च गन्धादिकुसुमोर्चितं ॥ अलाभिवज्रकस्तरं कटिकांचीपदार्चितं ॥ असमरक्षिणारोर्द्दरो
रत्नाणिविविधानि च ॥ शूलचक्रध्वजारानंस्थाश्चामेपरं शृणु ॥ पारिजातजाप्यमालापुस्तकं चोभयेपि प्रिये ॥ शोभाभ्यां चैव वा·
हुभ्यां व्रस्लचर्मविदारणं ॥ ततोरक्तनिर्मस्तोकं जुरीयं योनीमध्यान: ॥ ध्यात्वा तद्रक्षिसम्भूतं देवीरूपमनन्यधी ॥ स्वात्मानं मूलस·
द्योक्तं कुर्यात्सम्यक्विभावयेत् ॥ ॥ कामेश्वरस्य ध्यानं ॥ करालं स्मश्रुपालं च खड्गकर्पर धारणं ॥ पूजयेद्येनमयन्त्रं दष्ट्रा·
भिन्नाधरानन्तं ॥ क्रीडन्तिकल्पवृक्षं च स्वच्छायरत्नभूषितं ॥ ॥ लौहित्ते सर्वगौरांननीलवस्त्रविभूषितं ॥ रत्नमालासमायुक्तं च
तुर्वाङ्गसमन्वितं ॥ पुस्तकं श्वेतवर्णाच विभ्रन्तरक्षिणे तथा ॥ वामेशक्तिध्वजं चैव शिशुमारस्थितं शुभं ॥ ॥ पाराण्डनाथभैरवस्य
ध्यानं ॥ पुस्तकं श्वेतवर्णाच विभ्रन्तरक्षिरो तथा ॥ वामेशक्तिध्वजं चैव शिशुमारस्थितं शुभं ॥ ॥ पाण्डनाथभैरवस्य ध्यानं ॥ भैरव
पाराउनामाथरक्तगौरं चतुर्भुजः ॥ पद्मपाशशंखचक्रवाहुकरेषु च ॥ ॥ दक्षिणाम्नायनकोटिंजुन्दिनंरकवासशं ॥ त्रिनेत्रं.

राम:
६६

मूर्द्धकेशंचमुण्डमालाविभूषितं॥जटाभारलसच्चन्द्रखण्डमुग्रंज्वलन्निच॥कुंभभैरवभैरवीध्यानं॥सूर्य्यकोटिप्रतीकाशंच
न्द्रकोटिसुशीतलं॥तथादशभुजन्देवंपंचवक्त्रंत्रिलोचनं॥अमृतार्णवमध्यस्थंब्रह्मपद्मोपसंस्थितं॥वृषारूढंनीलक
ण्ठंगदामुशलधारिणं॥खड्गखेटकपट्टीशांकुमुद्गरपूर्णकुंतकं॥विचित्रखेटकन्दिव्यंवरदाभयपाणितं॥लाहितन्देवदेवे
समनसासन्निभावयेत्॥तस्योत्संगेसुरान्देवींचन्द्रकोटियुतप्रभां॥हिमकुन्देन्दुधरणासर्वायुधकरोद्यतां॥प्रहसन्तीवि
शालाक्षीदेवदेवस्यसन्मुखीं॥अथवादेवदेवेशमर्द्धनारीश्वरंविभु॥ ॥प्रचण्डभैरवस्यध्यानं॥वामभागेस्थितादेवीयौ
वनोन्मत्तविग्रहा॥प्रतिष्ठानामसादेवीनित्यन्तुसंगगामिनी॥सद्भावसंभैरवन्नामक्रीडानंदैकनिर्भरं॥विनतासनमा
रूढाविद्युत्पुंजसमप्रभं॥ ॥त्रिवक्त्रंषड्भुजंरौद्रंकालानलसमप्रभं॥मुकुटेनविचित्रेणअर्द्धचन्द्रेणदीपितं॥कपा
लमालाभरणांकरौमुद्राविभूषितौ॥पाशखड्गंतथासूत्रंकमुवापंसमुद्गरं॥दीप्यमानामहाज्वालालेलिहानामडुस
हा॥सर्वलक्षणसंपूर्णासर्वावयवशोभितं॥विद्याशक्तिसमोपेतंक्रीडमानंसुतेजस॥त्रिमूर्त्तिभैरवन्देवंसर्वसिद्धि

ध्या.मा. ६७

प्रदायकं ॥ व्याघ्रासनसमारूढं ग्रसन्तिवचराचरं ॥ ॥ नीलमेघप्रतीकाशं नीलवैडूर्य्यसन्निभं ॥ अष्टंचाष्टभुजंदीप्तं मकुटेनुभू
षितं ॥ दिव्यकुण्डलगण्डलसम्पूर्णकिरीटिदिव्यभूषितं ॥ कर्णिकाउमस्तकाग्रंस्थूलनदृश्विशानःस्थितं ॥ कार्य्यंशङ्खंतथासूत्रंवामेखट्वाङ्गशो
भितं ॥ सर्वालंकारसंयुक्तंसर्वावयवभूषितं ॥ दिव्यरक्तकृतामालाकराठस्याचविराजते ॥ वशीभोभैरवोनामसान्माशक्त्यासमन्वितः ॥
क्रीडमानंसुहस्तान्नमादिव्यानंदैकनिर्भरं ॥ हंसपृष्ठसमारूढंदीप्यमानंसुतेजसं ॥ ॥ कुंकुमारुणादीप्ताभं मदिरानन्दनन्दितं ॥ ईश
हज्जाज्ञसंकाशंत्रिनेत्रंसुकुटेर्ज्वलं ॥ दीप्तंसुक्तिकृतामालाकराठस्याचप्रलम्बिता ॥ चतुर्भुजंमहाभीमसर्वलक्षणसंयुतं ॥ त्रिशूलखट्व
रदन्दंवोकाघंखड्गवामके ॥ दीप्यमानामहास्तामीसूर्य्योयुतसमप्रभं ॥ नानालंकारशोभाढ्यंनूपुरारावनादितं ॥ ग्रसन्याशक्तासंयुक्तं
क्रीडमानंसुदारितं ॥ मृगासनसमारूढंअष्टासनामनामतः ॥ ॥ कृष्णांजननिभाकारंकृष्णपिंगललोहितं ॥ अष्टचाष्टभुजंरौद्रंसूर्य्यं
टमहोत्कटं ॥ करौकुण्डलसंयुक्तंदीप्यमानंमहौजसं ॥ खड्गखाण्गामयापाशमभयंचैवदक्षिणे ॥ खेटकधनुरूपकंसुस्थंसुस्त्रंवामेविराज
ते ॥ नानाशंखकृतामालांनानाभ्रम्यसमन्वितं ॥ वामुण्डासमारुतंक्रीडमानंमहोत्कटं ॥ प्रेतासनसमारूढंभूतीशंभूतव्यापकं

राम: ६७

सरदासुदसंकाशं त्रिनेत्रं च चतुर्भुजं ॥ दिव्यकुण्डलसंयुक्तं किरीटमुकुटोज्वलं ॥ नानारत्नफणामालाकालस्या च विराजते ॥ शूलं सूत्रं स्थितं दक्षे
कायदंडं तु वामके ॥ नानालंकारसंयुक्तं क्रीडमानं मुदान्वितं ॥ मयूरासनसंस्थं च अतीवसुमहाबलं ॥ नीलजीमूतवर्णाभं त्रिनेत्रं ष
ड्भुजप्रिये ॥ वज्रकुण्डलसंयुक्तं जटाजूटेन मण्डितं ॥ दिव्यनेत्रप्रभंदीप्तं रत्नमालासुदीपितं ॥ ह्रस्वस्थूलं महाबाहुं सर्वलक्षणसंयुतं ॥ कार्यं
खट्वाङ्गसत्वं च वामस्था करदीपिता ॥ वरदं स्यात्रिशूलं पाशं दक्षिणे तावि राजिते ॥ नानाभरणशोभाढ्यं नानागंधादिलेपितं ॥ नारायणप
समायुक्तं क्रीडमानं सुभक्षणं ॥ स्यान्नामा महारौद्रं वकपृष्ठासनं स्थितं ॥ दीप्तिमार्तंडसंकाशं ज्वलत्पावकतेजसं ॥ अथ चतुर्भुजं
दीप्तं रत्नकुण्डलमण्डितं ॥ दीवाकिरीटशोभाढ्यं जटाजूटेन मण्डितं ॥ नीलरत्नैः फणामालाकरास्या च विराजते ॥ कार्यं खेटकं वाम
स्या शूलं खड्गं च दक्षिणे ॥ दीप्यमाना महाराणी नानालंकारमण्डिता ॥ सर्वावयवसंपूर्णं सर्वलक्षणलक्षणं ॥ मोहन्याशक्तिनाश
क्रीडमानं तु खेचरया ॥ मकरासनमारूढं हस्तिनामं महाबलं ॥ नीलरत्ननिभं दीप्तं रक्तसर्वं चं अमलावलं ॥ त्रिनेत्रं षड्भुजं दीप्तं
किरीटकुण्डलोज्ज्वलितं ॥ महाशंखफणामालाकरास्या च विराजते ॥ अंकुशं कार्यं स्त्रं य वामस्या चक्रदीपिनां ॥ अभयं शूलपाशं

ध्या.मा.
६८

चदशिरेण महोज्वलं ॥ नानाभरणसंभाषां नानालंकारमण्डितं ॥ अनाद्यशक्तिधरानन्दक्रीडमानं तु दक्षिणे ॥ कण्ठपासनमारु
ढं रुद्रांशभैरवप्रियं ॥ ॥ कालानलप्रतीकाशं निर्मांसं चास्थिमण्डितं ॥ त्रिनेत्रं विकटं घोरं तीक्ष्णदंष्ट्रभयानकं ॥ भुजाष्टक
समोपेतं मन्दिरानन्दनन्दितं ॥ खेटकं परिघं पाशं कायज्वालामेव रञ्चितं ॥ खड्गं सूत्रं तथा शूलं नागराजं च शिरेण ॥ क्रीडमाना
सुहृत्स्नात्ययदशक्तिसमावृतं ॥ वाराहासनमारूढं भक्तीशोभनभैरव ॥ ॥ हिमकुण्डेन्दुवर्णाभं त्रिवक्त्रं नयनोज्वलं ॥ किरीटिकु-
ण्डलेयुतं शशाङ्ककृतशेखरं ॥ हेमरत्नकृतां मालाकण्ठस्थाप्रलम्बितां ॥ षड्भुजं अक्षावरदं कृष्णपीतारुणोज्वलं ॥ कुंभचापांकुशं
वामे हस्ते कार्यं महोज्वलं ॥ त्रिशूलं च तथा बाणं दीप्यमानं सखेटकं ॥ नानालंकारकृशोभं नानाभरणमण्डितं ॥ वज्रिणीशक्तिचे-
तस्कं क्रीडानन्दैकनिर्भरं ॥ गजस्कन्धसमारूढं स्वशोभानं तु भैरवं ॥ सर्वलक्षणसंपूर्णं सर्वावयवशोभितं ॥ ॥ नमस्तनकवर्णाभं
मुंदयादित्यसन्निभं ॥ त्रिनेत्रं चैकवदनं रत्नकुण्डलमण्डितं ॥ जटामुकुटसंयुक्तं किरीटदिव्यभूषितं ॥ चतुर्भुजं महादिव्यं नानालंका
रमण्डितं ॥ कायज्वागतथावामे शूलं सूत्रं चरम्भिरो ॥ करालीशक्तिनामार्ध क्रीडानन्दसुनन्दितं ॥ सिंहासनमारूढं मनुष्यीतं महा

राम:
६८

२८

वलं ॥ ॥ कृष्णांजननिभाकारं राजवर्त्तसमप्रभं ॥ करालवदनं घोरं दंष्ट्रोग्रं रक्तलोचनं ॥ पिंगजूटोर्द्ध संयुक्तं मुण्डकुण्डलमण्डितं ॥ भु-
जाष्टकसमोपेतं नागघोरांसमण्डितं ॥ कार्त्रिखट्वाङ्ग पाशं च सुदंडं वाममास्थितं ॥ शूलश्चलं तथा दण्डं तोमरं दक्षिणोद्यतं ॥ कपालीशा-
क्तिनासार्द्धं मदिनन्दनन्दितं ॥ अश्वारूढो महातेजा क्रूरनामा महावलं ॥ ॥ सिन्दूरारुणप्रख्यन्तु षड्वक्त्रं शिखिवाहनं ॥ किरीटकुण्डलयु-
क्तं त्रिनेत्रं करालिनं ॥ भुजाद्वादशकोपेतं नानाकेयूरमण्डितं ॥ शक्तिपाशन्तथा दण्डं मुसलं खड्गं च तोमरं ॥ दक्षिणेन महावाणी दीप्यमानं म-
हावलं ॥ चापं वाणं तथा नागं कात्र्यकर्णिकसम्पुटं ॥ वामेन करसंदीप्तं महावाणी महोज्वलं ॥ शिवाशक्तिरसैर्भिन्नं महास्वनमहावलं ॥
शूलयाम्बुदसंकाशं दीप्यमानं महावलं ॥ त्रिनेत्रं चैकवदनं वज्रकुण्डलमण्डितं ॥ जटाजूटेन्दुशोभितं कार्य्यमालाप्रलम्बितं ॥ चतुर्भुजं म-
हारौद्रं कार्त्रिशूलं च दक्षिणे ॥ दण्डखट्वाङ्ग वामेन दीप्तासुंदीप्तिवर्द्धनं ॥ घोरघोराभराकंटकौदासनथनलालसं ॥ जम्बुकासनमारू-
ढं क्रोधीसंनाम भैरवं ॥ ॥ पीतारुणानिभं दिप्तं त्रिनेत्रं मुकुटोज्वलं ॥ शंखकुण्डलदीप्तञ्च रत्नमालाप्रलम्बितं ॥ षड्भुजं च महातेजो-
नानालंकारमण्डितं ॥ कार्त्रिशक्ति तथा पाशं वामस्थाकरदीपिता ॥ शूलं खड्गं तथा नागं दक्षिणेन विराजते ॥ सर्वालंकारसम्पूर्णं वैसभर-

षण्मण्डितं ॥ षड्विंशशक्तिभोगांगं क्रीडमानं मतोत्कटं ॥ दसुहृसमारूढं रुद्रनाम महाबलं ॥ ॥ अतसीपुष्पसंकाशं स्निग्धदीपा
भवच्चसं ॥ दिव्यकुण्डलशोभाढ्यं त्रिनेत्रं मुकुटोज्वलं ॥ चतुर्भुजं महादीप्तं नानालंकारमण्डितं ॥ दक्षस्थखड्गपाशं च खेटकं कापवाम
कं ॥ वागेशीशक्तिसंयुक्तं क्रीडमानं सुविह्वलं ॥ गृध्रासनसमारूढं प्रचंडनाम भैरवं ॥ ॥ नीलोत्पलदलश्यामं नीलवैडुर्यसन्निभं
वज्रकुण्डलसंयुक्तं किरीटमुकुटोज्वलं ॥ प्रसन्नवदनं दिव्यं रक्तो कुण्डलसन्निभं ॥ भुजानकं महाभीमं नानारत्नविभूषितं ॥ वामेमकु
शपद्मं च पाशस्वामे विराजते ॥ शूलं सूत्रं तथा नागं फलसंदक्षिणे तु घटं ॥ सर्वलक्षणसंपूर्णं सर्वावयवशोभितं ॥ घोरघोषा च उ
त्संगं क्रीडमानं सुलालसं ॥ पद्मासनसमारूढं शिवनाम महाबलं ॥ ॥ धुम्राभं सुसुवर्णं च नीलजीमूतसन्निभं ॥ अक्षं चतुर्भुजं दे
वं दिव्यकुण्डलमण्डितं ॥ किरीटरत्नशोभाढ्यं दिप्यमानं सुतेजसं ॥ वरदं च तथा शूलं दक्षिणस्था प्रदीपिता ॥ कापवामे तथास्रु
वन्दीप्यमानं महोजसं ॥ विरशक्ति समायुक्तं क्रीडानंद भरालसं ॥ कपोतासनमारूढं मेकपादं च भैरवं ॥ ॥ पीतारुणेन वर्णे
न चंद्रमण्डलसन्निभं ॥ त्रिनेत्रं षड्भुजं देवं रत्नकुण्डलभूषितं ॥ मुक्ताफलकृतामालाकण्ठस्था च विराजते ॥ खड्गाङ्कुशपाशमभयं

रभिराणस्यामहोत्कटा॥ त्रिशूलंडमरुंखड्गंवामेनकरदीपिता॥ नानाभरणशोभाढ्यंनानाश्रग्दाममण्डितं॥ भोषणीशक्तिवामांगेक्रीडान
नावलोकरा॥ श्वानासनसमारूढांकुम्भनामेनभैरवं॥ ७॥ अश्ववक्त्रंमहाभीमंकिरीटिकुण्डलान्वितं॥ चतुर्भुजंमहारौद्रंसर्वावयवशो
भितं॥ शंखकुन्देन्दुवर्णाभंज्योत्स्नाकिरणदीपितं॥ खड्गखेटकसंयुक्तंखत्रदण्डसमुद्यतं॥ दिव्यहेमकृताभरणैर्हेमसूत्रप्रलम्बितं॥ वा-
मवेगाख्यन्तंगक्रीडानन्दसुविह्वलं॥ कुक्कुंपृष्ठसमारूढंमेकनेत्रंचभैरवं॥ ॥चतुर्वक्त्रंसुनेत्राढ्यंत्रिनेत्रमुकुटोज्वलं॥ किरीटि
रत्नसन्दीप्तंवज्रकुण्डलमण्डितं॥ दिव्यरत्नकृतामालाकराभस्याचविराजते॥ षड्भुजंचमहारौद्रंनानालंकारमण्डितं॥ कार्येशाननथा
शूलंवामस्याकरदीपितं॥ त्रिशूलंवरदंपाशंदक्षिणेनकरेयुता॥ नामाशक्तिसमायुक्तंक्रीडेनेत्रंचकिरीननं॥ भुजाष्टकसयोपेतंना
नाभरणमण्डितं॥ सर्वावयवशोभाढ्यंसर्वलक्षणसंयुतं॥ त्रिशूलंकर्तरीखड्गंनागराजंचदक्षिणे॥ काण्डखेटकसूत्रंचइषुवामे
विराजते॥ विनायस्याशक्तिर्युतेरत्यानन्दाकुलेक्षणां॥ वेसरासनमारूढंपवित्रनागनामतः॥ ८॥ शशिकुण्डनिभप्रीतंसर्वाव
यवशोभितं॥ असंचतुर्भुजंभीमंकिरीटिकुण्डलैर्युतं॥ सर्वाभरणशोभाढ्यंदिव्यश्रग्दाममण्डितं॥ अंकुशंपरिघंपाशंदक्षिणेन

प्रदीपितं ॥ कार्यं सूत्रं तथा शूत्रं वामेन च करोद्यता ॥ पूर्णाशशंकासमोपेतं रतिक्रीडा मनोत्सुकं ॥ गृडासनमारूढं सर्व्वमनामा च
च भैरवं ॥ ॥ श्वेतो रूपो महादीप्त सर्वलक्षणसंयुतं ॥ अक्षं चतुर्भुजं भीमं किरीटं जूटमण्डितं ॥ हेमकुण्डलदीप्ताभं मर्द्धेंदुकृ
तशेखरं ॥ मुक्ताफलकृतामालाकुण्ठस्याच प्रलम्बितां ॥ कार्यं परिघवामेन स्फुलं सूत्रं च दक्षिणे ॥ नानाभरणशोभाढ्यं पद्ममाला
विभूषितं ॥ हुंकारीशक्तिनासार्द्ध क्रीडानन्दैकलालसं ॥ शिनकाकसमारूढं सोमेसंनामभैरवं ॥ ॥ नीलाम्बुदप्रतीकाशं गजमानेसु
भीषणं ॥ त्रिनेत्रं षड्भुजं रौद्रं वज्रकुण्डलमण्डितं ॥ नयजूतधरं दिव्यं स्वस्यायरमण्डितं ॥ मुक्ताफलकृतामाला आपाद तलमण्डितं
सर्वावयवसंपूर्णं सर्वाभरणमण्डितं ॥ कार्यं खड्गस्मुण्डं च वामेन करशोभितं ॥ त्रिशूलं चाङ्कुलं पाशं दक्षिणेन विराजितं ॥ कर्द
शशक्तिवामस्या क्रीडानन्दकनिर्भरं ॥ उलूकासनमारूढं लांगलीशं महाबलं ॥ ॥ रुधिराख्यातेजाढ्यं त्रिनेत्रं च चतुर्भुजं ॥
दिव्यकुण्डलशोभाढ्यं किरीटिमुकुटोज्वलं ॥ शंखरत्नकृतामालाकण्ठस्या च विराजते ॥ कार्यं खड्गं वामस्या शूलं सूत्रं च दक्षि
णे ॥ सर्वाभरणशोभाढ्यं सर्वलक्षणसंयुतं ॥ इन्द्राशक्तिसमोपेतं क्रीडाशक्तिस्तुलालयः ॥ चक्रवाकासमारूढं भैरवं दारु

कंप्रिये॥ ॥श्वेतारुणासुदीप्ताभं त्रिनेत्रं षड्भुजं महत्॥ रत्नकुण्डलसंयुक्तं किरीटिमुकुटोज्वलं॥ महाशंखकृतामालाकराग्र
स्याचतुर्दीपिता॥ कार्यं कीर्तिं तथा शूलं वामेन करदीपिता॥ खट्वांगं खड्ग पाशं च दक्षस्या च विराजते॥ सर्वलक्षणसम्पूर्णा सर्वाभ
रणभूषितं॥ कपालीशक्तिला सार्द्ध क्रीडनन्दाकुलेक्षणं॥ कंकालासनमारूढं नीरीसनामनः॥ नीलोत्पलदलश्यामं नीलजीमूत
सन्निभं॥ अक्षं चाष्टभुजं न्येष्ठं सर्वायमपशोभितं॥ मुण्डफलकृतामालां कण्ठस्या च विराजते॥ किरीटिकुण्डलयुतं रत्नदीप्तास
मुज्वलं॥ त्रिशूलं करीपाशं कार्यम्वामे विराजते॥ अक्षसूत्रं तथा गंधा चापं वाणं च दक्षिणे॥ नानाभरणशोभाढ्यं सर्वलक्ष
णसंयुतं॥ दीपनीशक्तिरेन स्वं क्रीडानन्दस्तु निर्भरं॥ मेषासनसमारूढं उमाकान्त च भैरवं॥ ॥पीनारुणेन वर्णेन सर्वल
क्षसंयुतं॥ किरीटिरत्नखचितं दिव्यकुण्डलमण्डितं॥ अक्षचतुर्भुजं दीप्तं नानाभरणमण्डितं॥ कार्यं खेटक वामस्या दक्षे सूत्र
कमण्डलं॥ जयंतीशक्तिवामेन क्रीडानन्दस्तु विह्वलं॥ सिंहासनसमारूढं आपाधीभैरवप्रिये॥ ॥अक्षचतुर्भुजं न्येवकि
रीटिमुकुटोज्वलं॥ स्निग्धश्यामेन वर्णेन रत्नकुण्डलमण्डितं॥ दिव्यपद्मकृतामाला आपादतललम्बिनी॥ कार्यं सूत्रं तथा वा

ध्या. मा. ७१ मुशलं दण्डञ्च दक्षिणे। सर्वलक्षणसम्पूर्णं नानाभरणमण्डितं। पार्वतीशक्तिनासार्द्धं क्रीडानन्दैकनिर्भरं। छागपृष्ठसमारूढं
दण्डीशनाम भैरवं॥ ॥ धूम्रात्युद्भूतिकाशं दीप्यमानं सुतेजसं। त्रिनेत्रं वक्त्रजं भीमं रत्नकुण्डलदीपितं। मुकुटेन विचित्रेन र
रत्नपूरमण्डितं। कार्यं फलसंतं घण्ठा वामस्या करदीपिता॥ त्रिशूलं वज्रपरिघं दक्षिणेन करायुधं। परा शक्त्या कृतानन्दं क्रीड
मानं सुनिर्भरं। धात्रीशो भैरवो नाम नागभोगासनस्थितं॥ ॥ मुक्ताफलनिभाकारं दीप्यमानं सुतेजसं। नीलवज्रकृतामाला
कण्ठस्याच प्रलम्बिता। हेमकुण्डलशोभाढ्यं पद्मरागकिरीटितं। अक्षं चतुर्भुजं देवं सर्वावयवशोभितं। सर्वलक्षणसम्पूर्णं
नानालंकारमण्डितं। कार्यमीनं कृतं त्वामे भुजं शक्तिश्च दक्षिणे॥ अम्बिका शक्तिसंगेहं परानन्दाकुलक्षणं॥ क्रौंचासनस
मारूढं मीनेसन्नाम भैरवं। नीलधूम्रप्रतीकाशं दीप्यमानं सुतेजसं। मेघवक्त्रं त्रिनेत्रं च किरीटि कुण्डलान्वितं। सर्वाभरण राम: ७१
णशोभाढ्यं षडङ्गं च महाबलं। कार्यं वज्रं तथा चैव पलं वामे न करदीपिता॥ खड्गं चर्मं तथा पाशं दक्षिणेन विराजते। छा
गली च कृतासंगक्रीडानन्द सुनिर्भरं। पञ्चकाशनमारूढं मेघरूढं महाबलं॥ ॥ गैरिकावर्णदीप्ताग्रं दीप्यमानं सुभीषणं

भसंचतुर्भुजंदेवीप्रगोमुखंचकिरीटिनं॥ रत्नमालाशिरेदेव्याहेममुद्राविभूषितं॥ काद्यखेटकवामस्याशूलंसूत्रंचदक्षिणो
नानाभरसंयुक्तंपूजनोत्संगशोभितं॥ व्याघ्रासनसमारूढंलोहितेनामभैरवं॥ ॥भस्मोज्वलितवर्णाभानाराभिवसुदीपि
तं॥ षड्भुजंचोग्रवदनंकरौंनाडकमंडितं॥ किरीटिनंमहानेजंवर्णभारावलंबितं॥ कार्यपिशितखर्परंचअंकुशंवाममाश्रि
तं॥ त्रिशूलंमुद्गरंघण्टांदक्षिणेनकरोघटा॥ आमोदंशक्तिरानन्दंकोजमिसंरसमानसं॥ मृगपृष्ठिसमारूढंशिखीशंना
मभैरवं॥ ॥काककोकिलवर्णाभंकुन्दसुदसमप्रभं॥ छागवक्त्रंत्रिनेत्रंचकलस्वकरोरीटिनं॥ दिव्यशंखहतामाला
कण्ठस्याचविवर्जितं॥ चतुर्भुजमहाकायंवज्रमालाविभूषितं॥ काद्यखड्गवामस्थात्रिशूलंखड्गदक्षिणे॥ सर्वलक्षणासंपू
र्णंलक्षिनाशोक्तिनिर्भरं॥ कोकिलासनमारूढंकुलगलंठमहावलं॥ ॥श्वेतनाहरानिभप्रंत्रिनेत्रंद्विभुजंप्रियं॥ वज्रकुण्ड
लशोभाढ्यंकिलिटिमुकुटोज्वलं॥ कार्यत्रिशूलसंयुक्तंनानालंकारमण्डितं॥ संहारेशाक्षिनामाहंक्रीडारतिनिर्भरं॥ रा-
वयासनमारूढंहिरण्यनामभैरवं॥ ॥नीलजीमूतवर्णाभंउग्रभिखनगर्जितं॥ महाशंखकृतांमुद्राकण्ठस्याचविरा

ध्या.मा. ७२

जनं ॥ अष्टचतुर्भुजं भीमं दंष्ट्रालं रक्तलोचनं ॥ किरीटिरत्नसंकाशं वर्णाभासा प्रज्वलितं ॥ कात्रखट्वाङ्गवामस्या शूलं वज्रं च दक्षिणे ॥ नाना
लंकारसंयुक्तं सर्वावयवशोभितं ॥ महाकालीसमोपेतं मादिरानंदनन्दितं ॥ श्वेतपृष्ठिसमारूढं महाकालं च भैरवं ॥ ॥ पीतनीलकव-
र्णाभं दिव्यमानं सुतेजसं ॥ त्रिनेत्रं षड्भुजं देवं नानालंकारभूषितं ॥ किरीटकुण्डलयुतं नागकेयूरभूषितं ॥ कात्यघण्टं तथा शक्तिं वा
मेन करदीपितं ॥ शूलपाशं च परिघं दक्षिणेन करायुधं ॥ कुसुमायुधसमोपेतं शिनिकालोकदा ॥ गोधासनसमारूढं वालीशं नाम
भैरवं ॥ ॥ रक्तं सहस्रार्कप्रकाशं बंधूकानलप्रभं ॥ केशोर्ध्वशिरस्कं नानामणिरत्नप्रदीपितं ॥ हेमकुण्डलसंपूर्णं वनमालाविभूषितं ॥ भु-
जास्रकसमोपेतं नानालंकारभूषितं ॥ कार्यं दण्डं तथा शक्तिं नागं वामेन संयुतं ॥ शूलं खड्गं तथा वाणं दक्षिणे करसंयुतं ॥ शुक्लाशक्तिमरा-
नन्दं भुजंगमे पसंस्थितं ॥ गौरालिङ्ग्येन वर्णं नाद्रस्वरस्थलं लम्बोदरं ॥ किरीटि रत्नबद्धं वज्रकलमणितं ॥ मुक्ताफलकृतामालाकण्ठ
स्याश्च प्रदीपितं ॥ त्रिनेत्रं षड्भुजं रौद्रं नानालंकारभूषितं ॥ कार्यं शूलं च परिघं वामेन करदीपितं ॥ खड्गपाशदण्डं च दक्षिणास्य करे(
यता: ॥ नाराशक्तिकृतासंगे नीडानन्दैकलालसं ॥ पिनाकोदं महाकायं वानरासनमाश्रितं ॥ ॥ भिन्नवैदूर्यसंकाशं त्रिनेत्रं च चतुर्भुजं

राम: ७२

३३

सर्पकुण्डलसंभूतं किरिटिमुकुटोज्वलं ॥ कपालं चैव खट्वांगं त्रिनेत्रं कर्त्ति दक्षिणे ॥ नानालंकारशोभाढ्यं सर्वावयवसंयुतं ॥ नानोशक्तिमदे
न्मनाखड्गशोभसंगरागामीनि ॥ ॥ सितकुन्देन्दुवर्णाभं दीर्घग्रीवं वृकोदरं ॥ दिस्तीर्णास्यत्रिनेत्रं च किरिटिकुण्डलैर्युतं ॥ जवाकुसुममाला-
वषड्भुजं पीनवाससं ॥ कायं कंचुकथास्कन्धं दक्षिणेन करोद्यता ॥ त्रिशूलं कर्त्तरी खड्गः वामस्याकरशोपिना ॥ सर्वलक्षणसंपूर्णं क्रियाश
क्त्याभिमण्डितं ॥ वकीशनाममहारुद्रं चिन्मसनवपवस्थितं ॥ ॥ स्वेनारुणसुदीप्ताभं स्थितासुरलंकृतं ॥ कोनराश्वविकृदंष्ट्रत्रिनेत्रं च कि
रीटिनं ॥ लम्बकर्णासुतेजाढ्यंतुपुरारावनादितं ॥ चतुर्भुजं महाउग्रनानाभरणमण्डितं ॥ कायंग्रएठस्थिता वामे दर्पणशूलदक्षिणे ॥ गाय
त्रीसंगसंहृष्टक्रीडानन्दमनास्तुकं ॥ वृषभासन्नमारूढं स्वेनरुद्रं महाबलं ॥ ॥ नीलांजननिभं चन्द्रमंशशाकरूतशेषरं ॥ रत्नकुण्डल
सन्दिप्तं त्रिनेत्रं षड्भुजं प्रिये ॥ विशालनयनसौम्यभीषण्प्रहसिताननं कपालं चैव खट्वांगं पाशश्वामे कृतायुधं ॥ कर्त्तरिशूलपरिघं
दक्षिणेन विराजयेत् ॥ नानालंकारशोभाढ्यासर्वावयवशोभितं ॥ सावित्रीशक्तिधामांगे क्रीडानन्देकनिर्भरं ॥ भृगुनामा महारुद्रं पञ्च
याना सनस्थितं ॥ शंखकुण्डेन्दुवर्णाभं दीर्घकायं दिगंवरं ॥ किरीटिनं महातेजा त्रिनेत्रं च चतुर्भुजं ॥ दिव्यरत्नकृतामाला कण्ठस्याच

भा.मा. ७२

